श्चर्यं ब्रूमः श्रुहहेति खेदे धमनी नाडी वर्तते न वा इति ज्ञातुं वाहोर्वलयं पाणिमूलं प्रयाति ग

इति अत्र प्रकटमेव प्रागल्भ्यं मदांकांताह्लादः ४८ परकीया प्रोषितभर्तृकामुदाहरति श्वश्रूरि
रस. ति मा तापत्रद्दलं ददाति कौतूहलेनेति तदपि पत्रदलं तया भ्रूभंगसूचनेन गृह्यते स्वीक्रि
टी. यते वपुः सद्यः तत्क्षणं तया मर्मशंका शुष्कपर्णध्वनिशंका तया स्पर्शमात्रेणैव शुष्के अस्मिन् दले म
१९ म विरहतापमासीदिति शंकयेत्यर्थः पाणिना न संस्पृशते सामान्या प्रोषितभर्तृका यथेयमुदाहर
७ ति विरहेति द्वारदेशे उपविष्टा पुरयोषितवेश्या इति हेमरक्षणो मरिचानां चयं समूहं त्यजति ति

परकीया प्रोषितभर्तृका यथा श्वश्रूः पत्रदलं ददाति तदपि भ्रूभंगया गृह्यते सद्यो मर्मरशंक
या न च तया संस्पृश्यते पाणिना पान्थवीचिस्मरहरणस्य वचसा प्रस्तुतं रदीयते श्वासः किंतु
न मुच्यते बहुतरं हृदं कुरंगीदृशा ४२ सामान्यवनिता प्रोषितभर्तृका यथा विरहवि
दितमंतः प्रेम विज्ञाय कांतः पुनरपि वसतस्मादेत्यमेदास्यतीति मदिचनिचयमत्तेण
श्रेयस्यवाष्पोदविंदून् विसृजति पुरयोषिद्वारदेशोपविष्टा ४३॥

श्यवाष्पोदविंदून् अश्रुजलकणान् विसृजति प्रकटयति इति किं कांतः कामी अन्तर्मनसीत्य
र्थः तस्मात् स्मादेत्य आगत्य पुनरपि पूर्ववत् वसद्धं तदा स्यतिः अपह्नुतिरलंकारः मालिनी
विरहेन विदितं ज्ञातं मम मत्प्रेम मे स्नेहं विज्ञाय स्वविषयकं मत्प्रेम ज्ञात्वेत्यर्थः॥ ॥ छंदः ४३ १९

३-२

मुग्धाखंडितानायिकेति तामुदाहरति वक्षइति प्राणेशः पतिः नवोढस्य दृशः नवोढा चासौ सहृदकस्या
नायिका नयनेन नेत्रे पिदधे आच्छादयत् किंभूता यामस्य शेषे वक्षउरःस्थलं कलशांकितं नखदचिह्नि
तं किमनुवितर्के इतीत्थं किमपि चिह्नादिकं प्रष्टुमिच्छन्त्याः बाल्येनास्य नायिकास्तनभोगचिह्न
मुग्धात्वात् पृच्छन्त्या इत्यर्थः आर्याभेद उपगीति ४४ मध्याखंडितानायिकेयमुदाहरति वक्षोजेति

अन्योपभोगचिह्नितः प्रातरागच्छति पतिर्यस्याः सा खंडिता प्रातरित्युपलक्षणम् अस्याश्चे
ष्टा अस्फुटालापचिंता संतापनिश्वासतूष्णीभावाश्रुपातादयः मुग्धाखंडिता यथा ।
वक्षः किमुककलशांकितमिति किमपि प्रष्टुमिच्छन्ती नयनेन नवोढस्य दृशः प्राणेशः पा
णिना पिदधे ४४ मध्याखंडिता यथा । वक्षोजचिह्नितमुरो दयितस्य वीक्ष्य दीर्घं न नि
श्वसिति जल्पति नैव किंचित् प्रातर्जलेन वदनं परिमार्जयन्ती बाला विलोचनजलानि
तिरोदधाति ४५॥

बाला नायिका दयितस्य प्रियस्य । वक्षोजचिह्नितं अन्यानायिकास्त
नचिह्नितं उरो वीक्ष्य दृष्ट्वा दीर्घमधिकं न निःश्वसिति निश्वासं प्रति किं विकृतं दर्शनेनेति भावः
किंचिदपि वक्तुं न जल्पति हृद्यपवभावः किं तु जलेन प्रभाते वदनं परिमार्जयन्ती प्रक्षालयन्ती
विलोचनजलानि अश्रूणि तिरोदधाति मद्दिङ्मात्रदर्शनेनायं विप्रियकृत् दयितः किंचिदुद्विग्नो न भवेदिति
वान्तर्यंतीति भावः ४५॥

रस॰ टी॰ २॰ 20

प्रौढा खण्डिता यथेन्तु दाहरति मा मुग्धे इत्यादि कोपि नायकः सखायं वदति अङ्गना नायिका प्रभा-
ते करतलात् दर्शमादर्शयत् किं वक्तव्यमेव चिह्नान्यवलोक्य स्वापराधं विगणयेति दर्शयति
ति स्मेत्यर्थः किंभूतां गगनाविपक्षपक्ष्मलदृक् विपक्षा सपत्नी चासौ पक्ष्मलदृक् तस्याः प्रश-
स्तानि पक्ष्माणि यस्याः सपक्ष्मलनाहृकास्या तस्याः पादाम्बुजालक्तकैरालिप्यमानं नमुखंय-
स्य तं मां उत्थानकरणादिति भावः चित्रार्पितेव चित्रलिखितेवाभवत् जातेत्यर्थः विषाद विमूढ

प्रौढा खण्डिता यथा मा मुग्धे त्वं विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकैरालिप्तानन मा-
नतीं कृतमुखी चित्रार्पितेवाभवत् रूक्षं नोक्तवती न वाक्षतवती निश्वासकोष्णं दृशो
प्रातर्मङ्गलमङ्गना करतलादादर्शमादर्शयत् ॥ ४६ ॥ परकीया खण्डिता यथा कान्तं निरी-
क्ष्य बलयाकितकं वैदृशमङ्गालस्याया परभिया परुषाणवाचः दृतीमुखे मृगदृशा सव-
लं दुस्पूरा द्रागानयं निदधिरे नयनान्तपाताः ॥ ४७ ॥

नेयति भावः किंच रूक्षं नीरसं नोक्तवती वा अथवा दृशो निश्वासेन कोष्णवाष्पैः किंचिदुष्ण-
स्मेन क्षतवती अत्रापि दृश्यवक्तव्याभावे पूर्वे स्मान्नेव भावः प्रातः मङ्गलहतं ॥ ४६ ॥ परकीया ख-
ण्डिता यथा कान्तं निरीक्ष्य बलयाकितकं टेदृशमुक्तास्तया परभिया परुषाणवाचः शीत परभि-
या प्रच्छन्नकामिन्यादिति भावः परुषाः कठोरा वाचा नोक्ताः किं तु तया दूतीमुखे सबदं दुस्पूराः
सवलन्नस्बुपूरैः प्रवाहो येषु ते नयनान्तपाताः दूरात्रिदधिरे निति

सामान्यवनिताखण्डितामुदाहरति उरस्त्वेवति वारस्त्रियावेश्यया इत्युक्ता प्रचलेचेतसः प्रियत
मस्य करतलात्कङ्कणच्छद्मायमाने कनककङ्कणे समाकृष्यते बलात् इत्यर्थः वारस्त्री गणिका
वेश्या पण्यस्त्रमरः इतीति किं न वेद उरस्यपयोधरौ किंतु अन्यानापि कान्तनखचिह्नितं यतो मे कुचमण्डलमा
ततो हेतो यत्सुरतं सर्वमङ्गीकृतं न वस्त्रखण्डनं तन्मयि विषये निधीयतां दीयतां शिखरिणी छंदः ४८ मुग्धा

सामान्यवनिताखण्डिता यथा उरसि नवपयोधरौ किं नमिदं कुतो मे समागतो मयि निधीय
ता वस्त्रपदमङ्गीकृतं इति प्रचलेचेतसः प्रियतमस्य वारस्त्रियाकङ्कणात्कनककङ्कणं कर
तलात्समाकृष्यते ४८ इति खण्डितासमाप्ताः ॥ पतितमेवमन्यपक्षात्परित्यक्ता कलहान्त
रिता अस्याश्चेष्टा भ्रान्तिसंतापसंमोहनिःश्वाससज्वरप्रलापादयः मुग्धाकलहान्तरिता यथा।
अनुनयति पतिं न लज्जमाना कथयति नापि सखीजनाय किंचित् प्रसरति मलयानिलेन
केवलं वहति परं तद्विरायमूर्च्छितमनः ४९।
कलहान्तरिता यथेमुदाहरति ॥ अनुनयतीति नवो
ढा मुग्धा लज्जमाना पतिं लज्जमाने इति योज्य कलहेनावमानितमित्यर्थः नानुनयति सखीज
नायापि किंचित्कथ्यादिनं कथयति परं केवलं मलयानिले प्रसरति सति चिराय चिरकालं मूर्च्छासान
रहितं अन्तःकरणं वहति विरहदाहकत्वाद्दक्षिणवायोर्विशेषेण निभावः पुष्पिताग्राछंदः ४८॥

रस॰ मध्याकलहांतरितातथा विरमतीति इतिसंचिंतयेतिभावः अथोमखोअधीनीचैर्मुखंयस्याःसाक
टी॰ लहंपतिनासहेतिशेषः सखीभ्योलयितमनालयितंसमाचकांदत्तधाष्ट्यांधाष्ट्याभ्याकथयितं
अकथयितंचेदित्यर्थः इतीतिकिंचेतः कथनंविनानविरमतिनशाम्यतीत्यर्थः निवेघइःखे
२१ नखिन्नाभवंतीतिपुनःकथनेमतिकायलज्जाअधाष्ट्याद्धेकेनशक्नोतीत्यर्थः संशयालंकारः

२१

मध्याकलहा विरमतिकथनंविनानचेतः सतिकथनेसमुपैतिकापिलज्जा इति
कलहमथोमुखीसखीभ्यो लयितमनालयितंसमाचकांच ५॰ प्रौढाकलहां अक
रोः किमुनेत्रशोणिमानंकिमकार्षीःकरपल्लवंनिरोधं कलहंकिमथामुथारसेन
हितमर्थंनविदंतिदेवदष्टाः ५१॥

पुष्पिताग्राछंदः प्रौढाकलहा अकरोरितिकापिसखीवदतिहेरसत्तिक्रीडारसानभिज्ञेयद्वा
क्रुद्धारसत्तेइत्येकपदंकोपरसत्तेत्यर्थः यद्वारसत्तेनायिकेक्रुद्धाकोपेनेतिसर्वत्रयोज्यंनेत्र
त्रशोणिमानं १ नेत्रयोःशोणिमानंरक्तत्वंकिंअकरोः मृषाहृतवतीत्यर्थः यद्वानायिकानेत्र
करपल्लरसत्तेंइयाराणामध्यवदतिरसत्ताजिह्वाशेषंपूर्ववत् पुनःमनत् हितंइतिदेवेनदष्ट
हताः हितमर्थंनविदंतिनजानंति औपछंदसिकंछन्दः ५९ २१

परकीयाकलहान्तरितायेत्येति तां दर्शयति भर्त्तुरिति सखी वदति हतधिया क्रोधान्मयावधीरि
तोऽपि ज्ञातः भो मातर्विधिरेवं बलीयान् नूनमेवेदं दुर्विलसितं न नेपराध इत्यर्थः सः कः यस्य भर्त्तुः शृ
ङ्गारादिरसेषु धिकस्तत्कृतेन तस्य व्ययं पत्नि निमित्तं इत्यर्थः गुरुः स्मरात्किल चतुरः अभूत् ममागणनीयो जा
त इत्यर्थः पुनर्गोष्ठीजनसमूहः कनिष्ठीकृता अदृश्याभूदित्यर्थः पुनर्धैर्यं विवेकत्वमित्यर्थः

परकीयाकल भर्त्तुर्यः स्मरकृते गुरुर्लत्चुरभूद्गोष्ठी कनिष्ठीकृता धैर्यं कोशयनं गतं
सहचरी नीतिः कृतार्हरतः निर्मर्त्कान्तरागा वत्रपया परिचिता स्रोतस्वती विंदुवत्सको
ध्याद्वधीरितो हतधियामातर्बलीयान्विधिः ५२ ॥

तदेव कोशायनं भाण्डागारगतद्रव्यं किमपि नावशिष्टमित्यर्थः पुनः सहचरी सखी तस्या नीतिर्हि
रतः कृता पुनर्जीवयात्तरणावत् तरोनतुल्य तिर्मक्काति मायेनत्यक्त इत्यर्थः पुनः स्रोतस्वती
स्रोतः प्रवाहो ऽस्यास्तीति गंभीरनीरा नदीत्यर्थः विंदुवत्परिचिता संकेतवर्त्मन्यागच्छन्त्यमयावि
दुता तत्स्यमत्यल्पमित्यर्थः अत्र नर्मस्फोटालंकारः शार्दूलवृत्तं ५२ ॥

रस॰ सामान्यकलहाः तरितां दर्शयति पर्यंके रहेति हे सखि प्रियो नायिकाः तत्सर्वं यथार्थमकरोत्
तस्मिन्नाट्टशिप्रकोपः अतिशायितः प्रकोपः कृतः मां धिक् निंदेत्यर्थः ममजीवनं प्राणधारणं
टी॰ धिक् निःपत्रनतुकामं धिक् येनैवमननंतत स्पृष्टं कृतं इतिभावः चेष्टितं कटाक्षादि धिक् तदि
२२ तिकिं यन्ममेति सर्वत्र संबंधः पाणिकमलेपर्यंके रहः तल्पलक्ष्मचिह्नं यस्मिंस्तत् यद्वा गपालये

२२

सामान्यवनिताकलहा पर्यंके रहः लक्ष्मपाणिकमले भागपालयेयद्गुरुः न्यस्तं वाममम
यत्ललाटफलके भागपात्त्वं वेधसा तत्सर्वं सखि योयथार्थमकरोत्तास्मिन्प्रकोपः कृतो
धिग्मां धिग्ममजीवितं धिगतनं तुधिक् चेष्टितं धिग्वचः इतिकलहांतरिता समाप्ता ॥

जन्मकुंडलिकायां गुरुः बृहस्पतिः वामः वेधसा ब्रह्मणा ललाटफलके मत्कंदरं भागपात्रे रे
न्यस्तं लिखितं सर्वेषां भागमत्त्वचकत्वात् द्वयोगमत्वं ख्यातिं त्व शार्ङ्गहस्ते ५२ ॥ ॥ ॥

मुग्धां विप्रलब्धां दर्शयति आलीभिरिति आलीभिः सखीभिरनेककपटैः अनेकैः कपटव्याजोपायेष्ठतैः
शपथैः कुंजोदरं संकेतीकृतं कुंजमध्यं नीतया प्रापितया विप्रलब्धा नायिका तत्र कुंजोदरं शून्यमपि
यद्रहितं निरीक्ष्य विलंबितया न प्रस्थितं न चलितं न स्थितं प्रियागमनागमनाभ्यां व्याकुलितमित्यर्थः
किंतु नवोढा चासौ नीरजदृक् च तया कुंजोपकंठे कुंजसमीपे दृष्टयोनल्पाः परितः क्षिप्ता इत्यर्थः किं
भूताः त्विषा केनचिन्मनोरथेन ताम्यंतो व्याकुलाः पथि भृंगाणां घोषाः कदंबसमूहलसत्कदंबरोभ्रमरदृष्टपा र
पटीनस्याश्चमत्कारस्त्विविलासास्तान् स्पृशंतीति तत्तुल्या इत्यर्थः निदर्शनालंकारः शार्दूलवृत्तं ॥

संकेतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा अस्याश्चेष्टा निर्वेदनिःश्वाससस
खीजनोपालंभचिंतास्रुपातमूर्छादयः मुग्धाविप्रलब्धा यथा आलीभिः शपथैरनेककप
टैः कुंजोदरं नीतया शून्यं तच्च निरीक्ष्य विलंबितया न प्रस्थितं न स्थितमनल्पाः किंतु नवोढ
नीरजदृशा कुंजोपकंठे त्विषा ताम्यद्भृंगकदंबरचमत्कारस्पृशो दृष्टयः ४४॥

४५॥ मध्याविप्रलब्धायथेमुदाहरति संकेतकेलिगृहमिति पएणोडश्चोर्मृगनेत्राया वचनमथो
त्तरमेव स्वर्णाभरणानि यस्मिंस्तनु वेत्रमर्ध विकासेव अर्धं विकासो यस्य तत् नूतनांबुजमध्यकव
लीकृतमेव तस्या विलितसर्वेन्द्रियाक्रियासंवंधः तद्दर्शने वैकल्याज्जडीभूते वस्थितवतीत्यर्थः किंभू
तायाः संकेतकेलिगृहमेत्य प्रियसंगमेच्छया प्राप्य तच्च शून्यं कांत

रस रहितं निरीक्ष्य निःश्वसितायतायाः निभृतेमंदं निश्वसिते यस्मिंस्तथाभूतोपरोयस्याः तस्याः श्रद्धा
धविकासिनेत्रमित्यर्थमकुलाद्दृष्टिः तस्यायद्रुष्टिरेष्यादिति ५५ वसंततिलकछंदः ॥ ॥
२२ प्रौढाविप्रलब्धा यथेत्युदाहरति ॥ शून्यमिति तथाभूतं संकेतं रहितं कुंजगृहं निरीक्ष्य वे
23 तोभवं कामं कुटिलं क्रूरं विज्ञाय प्रियविरहपीडाजनकत्वात् हृत्यपि न निवेदितां कांतां न य
नार्थं नाज्ञापिते त्यर्थः वाउत्सहचरीसखीमपिनोदृष्टा प्रियहंतां तामित्यर्थः परं तत्पंकजदृशा

मध्याविप्रलब्धा संकेतकेलिगृहमित्यानिरीक्ष्य शून्यमेणीदृशो निभृतनिःश्वसितायतायाः
श्रद्धार्धवचनमर्धविकासिनेत्रं नाहूलमधकवलीकृतमेवतस्थौ ५५ प्रौढाविप्रलब्धा
यथा ॥ शून्यं कुंजगृहं निरीक्ष्य कुटिलं विज्ञाय चेतोभवं हृत्तोनापि निवेदितासहचरीदृष्टा
पिनो वा तया शंभोशंकरचंद्रशेखरहरश्रीकंठशूलिन्शिवत्रायस्वेतिपरंतत्पंकजदृशा २

कमलनयनया इति पदं भंगीसमज्येनेग्निना स्मरामितिभंगः स्मरहरस्मे भंगीसच क्रे स्तुतिः
त्यर्थः स्तुतिश्चक्रे क्रियतेस्मइति किं शंभो शंकर शं कल्याणं भयसेरणाद्दिति शंकरोति इतियदह
यं सततस्मानांत्वं कारितेन चंद्रशेखर चंद्रकलावृषशेखरेति हृतीनिकामम्मित्रत्वाजदाभिषेद्धार
हिणीदुःखजनको माभवबिति नातोल्पभयमितिभावः हरतिसर्वेषां दुःखमितिहरः श्रीः शो
भाकंठे यस्य सः विषभक्षणात्ताद्दोगे गस्य नीलकंठ त्वं यो भोगेयेवैःमौरी वृष्णनोदुःखविहरणं २२

किं यदिति भावः शूलेनेति त्रिशूलेन नितः शेषं हंतव्यं स्मरतापस्य अतः सर्वं वदाहो न युज्यते इ
ति न विस्मरणीय इति भावः शिवेत्यानंदरूपोसि त्वं यद्वा शिवा गौरी विद्यते यं धीगत्वेन यस्य सः त
था प्रियमिलनात्मा मय्यनुग्रहं कुरुष्वेति भावः शार्दूलवृत्तं ५४। परकीयाविप्रलब्धायथे
ष्टसहरति दत्वेति तव्याल त्वं गया प्रियो जन दृष्टः संकेतितः इति भावः किं कृत्वा धैर्य मेव भुजंगः
सर्पस्तस्य मूर्ध्नि शिरसि चरणौ दत्वा यद्वा धैर्यं च भुजंगश्च तेनोतयो मूर्ध्नि पुनर्लज्जारूपां नदीमुल

परकीयाविप्रलब्धायथा दत्वाधैर्यभुजंगमूर्ध्नि चरणावुल्लंघ्य लज्जानदीमंगीकृत्य घना
धकारपटलं तत्वान दृष्टः प्रियः संतापाकुलया नया च परितः पाथोधरे गर्जति क्रोधा
क्रान्तकृतांतमत्तमहिषी धात्या दृशो योजिते ५७ सामान्याविप्रलब्धायथा कपटवचन
भाजा केनविद्वारयोषा सकलरसिकगोष्ठी वंचिकावंचितास्मि

घनपुनः घनांधकारस्य पटलं वृन्दं निविडं मेघकारं तस्य पटलं समूहमंगीकृत्य गतयेति शेषः घन पु
नः संतापेनाकुलतया यापाथोधरे गर्जति सति सति क्रोधेनाक्रान्तो व्याप्तो यः कृतांतस्य मदिषस्तस्य
भ्रांत्या कालमहिषो यं भ्रमेणापरितः सर्वतो दृशोर्योजिते इति मेचकस्य विरहवेदिता न देवलोकेन
नैवं युज्यत इति भावः अत्र भ्रान्तिमानलंकारः॥ शार्दूलवृत्तं सामान्याविप्रलब्धायथेष्टसहरति॥

रस॰ टी॰ २५ 25

कपटेति सकलरसिकगोष्ठीनां वंचिकाभिर्वा स्वयोषा वेश्या केन चित्कपटवचनवक्त्रा कपट
वचनानि वक्तीति तेन वंचिता कृत्रिमालंकारहीने नेति भावः इति हेतोर्विगतो येभ्यो भृंगाः पल्लववि
हितं मेचकत्वं यीयेन स केलिकुंजः विकचानि फुल्लानि यानि कुसुमानि तेषां कांति छद्मना विहस
तीवेति शेषः उत्प्रेक्षालंकारः मालिनी छंदः ५८ अथोक्तां दर्शयति संकेतस्थलमिति उक्ता
उक्तं दिनास्पष्टमन्यत् अवधीति अवधिदिवसानागते प्रियस्मिन्सतीत्यर्थः प्रोषितपतिकायाम
इति विहसतीति भृंगसंगविदितिमेचकत्वं विकचकुसुमकांतिछद्मना केलिकुंजः ।।इति
विप्रलब्धा यथा संकेतस्थलं प्रतिभर्तुरनागमनकारणं चिंतयंती सा उक्ता अवधिदि
वसानागतप्रोषितपतिकायां नातिव्याप्तिः ५८ तस्या भर्तुरवधिदिवसे भवनागमननि
यम इति संकेतपदेन तद्व्यावर्तनात् अस्याश्चेष्टा अरतिसंतापजृंभाश्रृंगाकृष्टिकंपह
दितश्वासमावस्थाकथनादयः ।। निर्व्याप्तिर्नेति नेषधेहेतुमाह तस्या इति प्रोषितपतिका
यां भर्तुः अवधिदिवसे अमुष्मिन्दिने अहमागमिष्यामीत्यवधीकृतदिने भवनागमननियम इति
संकेतपदेन तद्व्यावर्तनात् तस्या उक्तायाः अरतिविषये हेतुः अंगाकृष्टिरंगमोटनपटले
लज्जादिना क्रियाविषयिकव्याजस्पष्टमन्यत् ५९ ।।

मुग्धोत्क्वायथेत्युदाहरति यत्राद्यापीति प्रियोद्यापिनसमागत इति यत्र् प्रतः प्रायोबाहुल्येन
परामर्त्याप्रपेदे प्राप्तवान् इत्यं चेतसि चिंतयत्यपि व्रीडयालज्जाया मन्खी नइच्छति किंच दीर्घं
निःश्वसितं न दधाति चकितं निःसंकं न प्रेत्यते उभयत्रसत्लोभीत्यस्यर्थः केवलं किंचिन्मनाक्
पक्कोयःपलांडुःकंदविशेषः तद्वत्पांडुरारुचिःकांतिर्यस्यास्ताकपोलस्थली धत्ते विरहसंता
पेन विभर्तीत्यर्थः शार्दूलछंद ॥५९॥ परकीयाविप्रलब्धायथेत्युदाहरति दत्वेति तत्र त
मुग्धाउत्क्वायथा यत्राद्यापिसमागतःपतिरितिप्रायःप्रपेदेपरामित्यंचेतसिचिंतयंत्य
पिसखीनव्रीडयाइच्छति दीर्घंनश्वसितंदधातिचकितंनेप्रत्तेकेवलं किंचित्पक्क
पलाडुपांडुरुचिंधत्तेकपोलस्थली ५९। परकीयाविप्रलब्धायथा दत्वाधैर्यंभुजंग
मूर्ध्निचरणौ कुलंच्यलज्जानदी मंगीकृत्यचनोपकारपटलंतयानदृष्टःप्रियः
त्वंगाप्रियोनदृष्टःसंकेतितइतिभावः किंकृत्वाधैर्यमेवभुजंगःसर्पस्तस्यमूर्ध्निशिरसिचरणौद
त्वायतद्धैर्यंचभुजंगमस्तस्तोनयोमूर्ध्निपुनर्लज्जारूपानदीउल्लंघ्यपुनःनोपकारस्यपटलंचनेतन
विउमंधकारंतस्यपटलंसमूहमंगीकृत्यगतयेतिशेषःचपुनःसंतापेनाकुलानयापार्थ्थयं
देजलधरेगर्जतिसतिक्रोधेनाक्रांतोयमयःकृतांतस्यमहिषस्तस्यभ्रांत्याकोलमहिषोय

रस. भ्रमरणपरितामर्दितोदृशोजितेश्ररिते मेघस्यविरहदेवेदिवान्नरवलोकनेनैवंयुज्यतइतिभावः अत्र
भ्रान्त्यमालंकारः शार्दूलवृत्तं ५७ सामान्याविप्रलब्धायथास्तदाहरति कपटेतिसकलरसिकगो
२५ ष्ठीनांवचिकासौवारयोषावेश्याकेनचित्कपटवचनवक्ताकपटवचनानिवक्तीतितेनवचिता
25

संतापकुलपानयाचपरितःपाथोधरेगर्जतिक्रोधंक्रान्तकृतान्तमन्मथद्विषभ्रान्त्यादृशो
योजिते सामान्याविप्रलब्धायथा कपटवचनभाजाकेनविश्वरयोषासकलरसिकगोष्ठी
वंचिकावंचितासौ इतिविहसतिदिगंष्टे गवितिप्रचविकचकुसुमकांतिछद्मनाकेलि
कुंजः ५८ मध्यादुक्तायथा अनितुनगतार्किसुप्रियस्वीभीतोभुजंगान्किमुकुंठावाप्र
तिषेधवाचिकिमसौप्राणाम्बरोवर्ततेने इत्यकर्णसवर्णाकेनकिरजःपानोपयानकलादलोकः
कापिनवोढ़नीरजमुखीवाष्पाद्कंमनुव्रतिति ५९ प्रौढाउक्तायथा भ्रान्तनिकुंजसखिदू
थिरसालवधोमातलस्मखिवानिपितस्मिमिरप्रतीया इच्छामिकिंचिदितिनीरधराभिरामो
दामोदरःकथयकिंनसमाजगाम ६१ ॥

कृत्रिमालंकारःदानेनेतिभावः इतिहेतोर्दिगंतो
येभृंगास्तापवविदिशोचचरन्तीयेनसकेलिकुंजः विकचानितेषांकांतिछद्मनाविहसतीवे
तिशेषःउत्प्रेक्षालंकारः मालिनीछंदः ५८ अथोक्तांदर्शयति संकेतस्थलमिति उक्ताउक्तेवि २५

स्नातमिति काचित्सखींप्रति वदति हे सखि किं न तपो न तप्तं तथापि अद्यापि इयता कालेन स नायको
नेत्रातिथिः नेत्रगोचर इत्यर्थः कथं न तत्कथयेति शेषः तपो दर्शयति वारिदवारिभिर्मेघजलैः
स्नानं पुनः अंचने कानने वासो विरचितः पुनर्मनसिजः कामदेवः शीतैश्चंदनबिंदुभिराराधितः
एतेन ज्योत्स्नायां रजन्यां कोपि तापो नोद्दिष्ट इति चंदनलेपो ध्वन्यते पुनः रजनी जागरणव्रतेन
नीता प्रापिता पुनः व्रीडा लज्जा दक्षिणा दत्ता त्यक्ता नायके इत्यर्थः तस्यागमनफलप्रतीतयेति भावः

परकीया उक्ता यथा स्नातं वारिदवारिभिर्विरचितो वासोंचने कानने शीतैश्चंदनबिंदु
भिर्मनसिजो देवः समाराधितः नीता जागरणव्रतेन रजनी व्रीडा च दक्षिणा तन्वि किं न
तपस्तथापि स कथं नद्यापि नेत्रातिथिः ६२ सामान्यवनितोक्ता यथा कथं न कांतः स
मुपैति कुंजमित्यं चिरं चेतसि चिंतयंती आलयान्निष्पतदस्रुवारा वारांगना कापि ध
नाभिलाषात् ६३ ॥

शार्दूलवृत्तं सामान्यवनितोक्ता यथेत्युदाहरति कथमिति कापि वारां
गना वेश्या धनाभिलाषात् निष्पतदस्रुवारा निष्पतदस्रुजलेन आलयत् आगानीत्यर्थः किं
भूता वेश्या कांता कथं कुंजे संकेते तस्यां न समुपैति इत्यं प्रकारेण चिरं चिरकाले चेतसि चिंतयंती
विचारयंती अत्रोपजातिवृत्तं इंद्रवज्रोपेंद्रवज्रालक्षणानि मिश्रितपादत्वात् इति उक्ता समाप्ता ॥
अथ ताम्रकसंज्ञा दर्शयति अथ मे प्रियवासक इत्यादि स्पष्टं वा रः ॥

सूर्यादिदिवसेतिविश्वः अस्याश्चेष्टासा किंक्रियावतीत्यर्थः मनोरथेत्यादि मनोरथश्चेतिसिव
द्धविधाकल्पनास्पष्टमस्मात् मुग्धावासकसज्जायेयमिति तामुदाहरति नवोढासमुखीनववधू
मुग्धेत्यर्थः समुत्कण्ठासहैव नेमानानूराद्वीक्षते पश्यति कान्तागमनमिति भावः किंभूतावा
सकस्थाने निक्षिप्तनवप्रियागमनद्वारस्य रजनौ रात्रौ आलीनां आसमंतालीनां विगूढं लज्जयेति भावः
इति वक्ष्यमाणप्रकारेण कामानुरूपांक्रियांकुर्वतीतिशेषः साचिस्मेरमुखी साचितिर्यकभू

अथवासकसज्जा अद्यमेप्रियवासर इतिनिश्चित्ययास्मरतस्यासामग्रीसज्जीकरोतिसावास
कसज्जावासकोवारः वासकसज्जायथा अस्याश्चेष्टामनोरथपरंपरासखीपरिहासस्तो
अश्रुसामग्रीसंपादनादयः मुग्धावासकसज्जायथा हारंगुंफति तारकान्तिरुचिरं ग्रथ्ना
तिकांचीलतां दीपं न्यस्यति नव्यं किं नबकूलं स्नेहं न धत्ते पुनः आलीनामिति वासकस्यर
जनौ कामानुरूपांक्रियांसाचिस्मेरमुखी नवोढासमसुखी दूरात्समुद्वीक्षते ५४ ॥

त्वेतिभावः सख्योनमां पश्यन्त्वितिधियेतिभावः स्मेरस्महासंमुखंयस्यास्साइतीतिकिंतारकान्तिरु
चिरं तारागणांशुद्धमुक्तिकानांयाकान्तिः शोभातयारुचिरं रमणीयं हारंमुक्तावलिंगुंफतिपुनः
कांचीलतिकेलिं विधास्यति लज्जयेतिभावः तारोमुक्तादिसंशुद्धौस्यात्तरलः शुद्धमौक्तिकइति
हारोमुक्तावलावितिविश्वः शार्दूलवृत्तं मुग्धावासकलज्जायथेति उदाहरति ॥

वनविहारादिमदनमहोत्सवमहाहंकारोमनो
यात्रिप्रभृतयः इत्यपिपाठोवर्ततेवासकसज्जाया
लक्षणं ॥

शिल्पमिति स्मरः कामः स्मेराननो भूत् किंक्वापि यदृशः कमलनयनायाः इत्थंप्रकारेणाच
रितं प्रतीत्यज्ञात्वा इत्थं कथं शिल्पकलाकौशलं दर्शयतं कौतुकात् कुतूहलात् कल्हारहा
रस्रजं कल्हाराणां सौगंधिकमलानां हारस्रजं हारविशेषेण मालां केणतीस्पर्शः चित्रप्रेक्षण
केन वेन चित्रावलोकनमिषेण किमपि निर्थग्भूत्वेत्यर्थः हारं समुद्दीत्तेनेकांतागमनजिज्ञा

मध्यावामकमज्ञायथा शिल्पंदर्शयितं करोति कुतकक कल्हारहारस्रजं
चित्रप्रेक्षणकेनेवन किमपि हारं समुद्दीत्तेते गृह्णणात्याभरणानवं सहचरी
भूषाजिगीषामिषादित्यपदृशः प्रतीत्यचरितेस्मेराननोभूत्स्मरः ३५

स्येयेति भावः पुनः सहचरीभूषणानां सखीभूषणानां जिगीषामिषात् भवदंलंकारेपित्वया मम
लंकरणानिरम्याणीति व्याजात् नवंनूतनमाभरणं गृह्णाति एवंविधव्यापारं चेतोभवत्वात्
स्मरएवज्ञातवान्नसख्येइतिचित्रं तथा लज्जाकपटारंभामहसकामायास्तस्यालज्जामदनसाम्य
शिल्पंकमकलादिकंयथाटूलहूतं ६८ प्रगल्भावामकमज्ञायथेत्युदाहरति कृतमितिवपुषिदे

र.मं. हेमभूषणं वलयादिकृतं पुनश्चिकुराणां धोरणी रचनाविशेषः भूषितां गुरुचंदनादिभि
टी. रधिवासिता पुनः शयनविधौ शय्यासमीपे क्रमुको गुवाकः वीटिकास्वनागवल्लीपत्ररचनास्ता
२८ सा संभृतः संधारणा कृता किं च हरिणीदृशा कांतागमनप्रतीक्षाकुलितेनेति भावः देहस्य
27 त्विषा कांत्या प्रसमं गगनं स्फुरति देहकांतिसंबंधेन शोभातिशयं प्राप्तानि केतकीकुसुमानि तेषां
कांतिभिर्भवनगृहं दुर्दिनमकारि मेघच्छन्नेऽह्नि दुर्दिनं तेनात्र मच्छायत्वं लक्ष्यते स्रग्धराछन्दः ६६

प्रगल्भावासकसज्जा कृतं वपुषि भूषणं चिकुरधोरणी भूषिता कृता शयनसन्निधौ क्र
मुकवीटिकासंभृतिः अकारि हरिणीदृशा भवनमस्य देहत्विषा स्फुरत्कनककेतकी
कुसुमकांतिभिर्दुर्दिनं ६६ मनोरथस्थ्य यथा आवयोरंगयोर्द्वैते भूयो विरहविप्लवः
अद्वैते च स्मिते ततः स्वार्थेऽपरस्फीते न स्याद्दृशोऽन्यवीक्षणम् ६७ ॥

मनोरथस्थायास्या यथेति निदर्शयति आवयोर्मम कांतस्य मयोः द्वैते द्वयोर्भावो द्वैतता चांगस्मिन् द्वैतवि
येऽर्थः पुनरपि वियोगेन कांतविरहेण विप्लवो दुःखं भविष्यतीति शेषः पुनरद्वैते आवयो
रंगैकत्वे स्फीते समृद्धे स्मिते अपरस्यान्यवीक्षणं स्यात् स देहालंकारः शार्दूल ६७ परकीयावासकसज्जा
यथेत्युदाहरति स्वश्रूमिति कांचिन्नायिका छलेन व्याजेन स्वश्रूं स्वापयति निद्रापयति ॥ १८

च पुनः प्रदीपांकुराग्रस्फुरद्दीपशिखां निरोधनेन एवंविधादिनाच्छादयतीत्यर्थः पुनः सौधकपोता
नां ये येना वालकास्तेषां निनदैः सांकेतिकं चेष्टितं संकेतसंबंधव्यापारं धत्ते करोति पुनः शय्याद्वा
रं वारं पार्श्वयोः शय्याभयशेते विवर्तितांगगलतिकायस्याः क्रियायां न घृष्टा स्यात् तथा लोलती प्रि
यागमनमुदा स्फुरंती कपोलफलतिर्यत्र क्रियायां न घृष्टा स्यात् तथा नत्वा तिके ह्वाणिप्रदेशे प्रियधि
याजारागमनसंभावनया कं रन्यस्य प्रेरयति ६८ सामान्यवनितावासकजायथेत्स्पृहरति ॥

परकीयावासकसज्जा श्वश्रूस्वापपतिच्छलेन चतिरोधत्ते प्रदीपांकुरान्च्युते सौधकपोत
पोतनिनदैः सांकेतिकं चेष्टितं शय्यापार्श्वविवर्तितांगलतिकं लोलत्कपोलस्थलं का
पिक्वापि करांबुजं प्रियधिया नत्वा तिके न्यस्यति ६९ सामान्यवनितावासकः चोलं नी
लनिचोलकं घणविधौ चूडामणिं चुंबने याचिष्ट कुचयोः करार्पणविधौ कांचीं पुनः
कांचनीं इत्थं चंदनचर्चितैर्मृगमदैरंगानि संकुर्वती ननु किं पत्रमनोरथं वितनुते वारस्त्र

चोलमिति नारंगनाविक्ष्णावारसुरतदिने सुयन्मनोरथं वितनुते न त्विं न किमपीत्यर्थः किंभूता इ
त्यं वक्ष्यमाणप्रकारेण चंदनेन चर्चितैर्वा प्रभैर्मृगमदैः कस्तूरीभिः अंगानि कारचरणस्तनादीनि
संकुर्वती श्रप्यावासंती इत्थं कथं नीलनिचोलस्य उपरितनप्रच्छदपटस्य कर्षणविधौ चोलकूर्पास

रस॰ टी॰ २८

कंयाचिष्येप्रार्थयिष्यामि पुनस्तुवेनेच्छामणिंकेयापाशरेत्नयाचिष्येपुनःकुचयोःकरार्पणविधौ
काञ्चनीकांचीत्तुदृग्वंटिकांयाचिष्येति चोलःप्रच्छदपटःचोलःकूर्पासकोस्त्रियामित्यमरः शार्दूलवृत्तं।
७। अथस्वाधीनपतिकांदर्शयति मदाकृतानेति मदासर्वदाअकृतेनेनाभिप्रायेणआज्ञांकरोतीति
एवंभूतःप्रियतमोयस्याः स्वाधीनपतिका अस्याश्चेष्टावनेस्यादयः मदीहर्षः अहंकारः स्वस्मिन्नाधि
क्यवुद्धिशेषंस्पष्टं मुग्धास्वाधीनपतिका यथेमदाकृतेति मध्येति काचित्सखीवदति हेसखिम
इतिवासकजासममाप्ता ॥ मदाकृताज्ञाकरःप्रियतमास्वाधीनपतिका अस्याश्चेष्टावनविहा
रादिमदनमहोत्सवाभिरतिमनोरथावाप्तिप्रभृतयः। मुग्धास्वाधीनपतिकायथा मध्ये
नकृशिमात्तनेनगरिमादेहेनवाकांतिमाश्रोण्योर्नप्रथिमागतोनजडिमानेत्रेनवावक्रि
मालास्येनदृढिमानवाचिपटिमाहास्येनवास्फीति प्राणेशाश्रवणस्यापिमञ्जुतिमनोमध्ये
ध्येकटिप्रदेशेकशिमाकृशत्वंनस्तनेगरिमागुरुत्वंननवापुनःदेहेकां वकिंकारणं ॥
तिमालावण्यंनश्रोण्योर्नितंवेप्रथिमापृथुत्वंनगतोगमनेजडिमाजडत्वंमंदगतित्वंननवानेत्रे
वक्रिमावक्रत्वंलास्येन्दस्यगीनाय्यात्मकेदृढिमादृढत्वंनवाचिपटिमापटुत्वंनवाहास्येहासरसे
स्फीतिमाप्रागल्भ्यनसर्वत्रमुग्धात्वहेतुरितिभावः यद्यप्येवंतथापिप्राणेशस्यमनःमध्येवम
ज्जतिलीनंभवति तत्रकिंकारणंनजानेइतिशेषः ॥ २८

शार्दूलछंदः मध्या स्वाधीनपतिका यथेमुदाहरति हे प्रियसखि प्रियाचाम्मे सखी तस्यास्संबोध
नं रतिमहोत्सवे संभोगक्रीडायां यद्यपि नकारो निषेधः च पुनः करेण यदपि नीवीधारणानि वस्त्र
ग्रन्थिवसनानि तदपि न स्थापितः एष प्रियः पतिः पार्श्वदेशं च यदि न मुञ्चति अतः परं किं कर्तव्यं मात
शिक्षयेति शेषः पुष्पिताग्राछंदः ७१ प्रौढा स्वाधीनपतिका यथेमुदाहरति वक्त्रस्येतिका चित्
सखी वदति हे सखि कान्तः प्रियकस्यास्त्रिनायिकायाः धन्यानाम अरविंदसुंदरदृशा नायिकाना

मध्या स्वाधीनपतिका यदपि रतिमहोत्सवे नकारो यदपि करेण च नीवीधारणानि
प्रियसखि पतिरेष पार्श्वदेशं तदपि न मुञ्चति चेत्किमाचरामि ७१ प्रौढा स्वाधीनपतिका
यथा वक्त्रस्याधरपल्लवस्य वचसो हासस्य लासस्य वा धन्या नाम अरविंदसुंदरदृशं कान्त
स्तनोति स्तुतिं स्वप्नेनापि न गच्छति क्षितिपथं चेतःपथं दृक्कथं काप्यन्या यदपि न स्य मे
सखि कथं तस्यास्तु भेदग्रहः ७२ ॥ कान्तस्तुतिकरणात् धन्यां अरविंददृक् कथं कथितं वक्त्र
स्य मृदुलस्याधरपल्लवस्य वचसो वचनस्य हासस्य हासरसस्य लासस्य नर्तनस्य स्तुतिं करोति इति
वक्त्रादौ सर्वत्र संबंधः किन्तु मदयितस्य भर्तुः स्वप्नेनापि जाग्रदनुभवसंस्कारः स्वप्नस्तेनापि का
प्यन्या नायिका क्षितिपथं मनोविषयं दृक्पथं दृष्टिविषयं न गच्छति न प्राप्नोति प्रसन्नतः चिन्ता

रस. नोऽप्राप्तिरित्यर्थः तस्या नाहं दृशास्य भेदग्रहः कथमस्त्येतेन समहं केनापि निमिषेण न भिन्नत्वमाभवति
त्यर्थः शार्दूलछंदः २२ परकीयास्वाधीनपतिका यथेशुदाहरति स्वीया इति काचन सखीव
टी. दति हे सखि स्वीया आत्मीयाः सरोरुहदृशः गृहे संततिर्भवंति यासां स्वीयानां विलासेन करा
२९ भिनयादिना क्वणितां कांचीकुंडले हे मर्कककरणानां ऊरणात्कारेण न विश्राम्यति तत्र कुंडलकर्ण
29 भूषणं हे मर्ककरणस्वर्णप्रधानं तत्र को हेतुः किं कारणं काननेनैव नेपुरपथे भ्रमणपथाः

परकीयास्वाधीन स्वीयाः संति गृहे सरोरुहदृशो यासां विलासक्वणत्कांचीकुंडले हे
मर्ककणरणत्कारेण न विश्राम्यति को हेतुः सखि कानने नेपुरपथे सौधे सखीसंनिधौ
भ्राम्यंती मम वल्लभस्य परितो दृष्टिर्न मां मुंचति २२।

पुरे पंथस्तस्मिन् सौधे सुधायाश्चूर्णेन निर्मितः
सौधस्तस्मिन् धवलगृहे सखीनां सन्निधौ मम वल्लभस्य दृष्टिर्मां परितः समंततो भ्राम्यंती न
मुंचति मां न त्यजति तत्र जानामीत्यर्थः अत्र स्वीयाभ्यः स्वाधिकाकथनेन व्यतिरेकालंकारः शार्दू
लवृत्ते २३ सामान्यवनितास्वाधीनपतिका यथेमुदाहरति सत्यं वेति काचित्सखीं वदति मृग २९
दृशः प्रतिमंदिरं ॥

मंदिरे मंदिरे इति वीप्सायामव्ययीभावः सत्येव यामं मृगदृशां सुधासागरो भूतसमुद्रस्तस्य स्रोत
स्मृतः तेन लग्नं यत्सरोजं कमलं तेन हृतः सुंदरः चमत्कारो येषां तेन एवं विधा दृशो विभ्रमा विलासाः किं त
चित्रमाश्चर्यं युवानस्तरुणाः प्रियः विचित्रमन्मथकलानां वैशद्यहेतोः उत्कर्षकारणेन वारंवारमध्य
वचिन्तहृदं मनोहरं वित्तं प्रयच्छन्ति ददति किं कारणं तन्न जानामीत्यर्थः शार्दूलछंदः १४ अथाभि
सारिकां दर्शयति स्वयमिति अभिसारयति इत्यादिना प्रियमानयतीत्यर्थः उक्तं च कामशास्त्रे अभिसरेत्

सामान्यवनिता स्यात् सत्येव प्रति मंदिरं मृगदृशां यामं सुधासागरैः तैः स्तुतसरोजसुंदरचम
त्कारदृशो विभ्रमाः चित्रं किं न विचित्रमन्मथकलावैशद्यहेतोः पुनश्चित्तं चित्तहरं प्रय
च्छन्ति युवा मध्य वा किं कारणं १४ इति स्वाधीनपतिका समाप्ता । स्वयमभिसरति प्रियम
भिसारयति वा सा अभिसारिका अस्याश्चेष्टा समवान् रूपभूषणाशंकाप्रज्ञा नैपुण्य कचेट

कां तेसारयेद्वा अभिसारिकेति स्पष्टमन्यत् अस्याश्च अभिसारिकायाः समया न रूपमादि स्पष्टं स्वीया परकीया
योरभिसारिसौ चेष्टिते समवमाह इतीति इत्यनेन प्रकारेण परकीयायाः स्वकीयायाश्च क्रमो अभिसा
रव्यापारयोग्यः प्रस्तुत एव उद्दिष्ट एव मुग्धाभिसारिका यथा उदाहरति हृतीति कश्चित् सखीं वदति
हे मुग्धे अयं दयिताभिसारसमयः दयितेभिसरणयोग्यः समयो जातः प्राप्तः त्वया लज्जा मुंच समम

रस॰ टी॰ ३१ 30

विफला दूती उपागता समीपं प्राप्ता पुनः सहव्यापिनी सह तिष्ठतीति तथाभूता सहचरी सखी रात्रिः दे
वेत्रो दैवं भाग्यं जानातित्व यथाभूतो ज्योतिर्विज्जलदो मेघः स्वेनेन शब्देन शुभां प्रस्थानवेलां दिशति कथय
ति पुनस्तिमिरस्तोमः अंधकारसमूहोपि झिल्लीरवैः भृंगारीध्वनिभिः मांगलिकीं मंगलनिमित्तां वा
चं तनोति विस्तारयति यथा कस्यचिज्जिगीषोर्यात्रासमये मंगले विस्तार्यते इत्यर्थः शार्दूलवृत्तं ७५॥

इति परकीयायाः स्वकीयायाः प्रस्तुत एव क्रमः। तत्र प्रथमाभिसा॰ दूती विघ्नमुपागता सह
चरी रात्रिश्चिरव्यापिनी दैवज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां शुभां वाचं मांगलिकीं तनो
ति तिमिरस्तोमोपि झिल्लीरवैर्जातोयं दयितेनाभिसारसमयो मुग्धे विमुंच त्रपां ७५ मध्याभि
सारि भीतासि नैव भुजगात्पथि मद्भुजस्पर्शं गे पुनः किमपि कंपमुरीकरोषि अंभोधरध्वनि
भिरक्षुभितासि नत्वि सह्यादिसाविवचनासि किमाचरामि ७६॥

मध्याभिसारिकेमुदाहरति भीतासीति कश्चिन्नायिकां व
दति हे कांते पथि मार्गे भुजगात्सर्पात्त्वैव भीतासि पुनः मद्भुजस्पर्शसंगे संबंधे किमपि ईषदपि क
पमुरीकरोषि सात्विक भावो यदादितिभावः उरंपुरीचोरणीचेत्यमरपाठात् हस्तप्रयोगश्चिंत्यः
किमाचारामि किमत्र मननमिसिंस्यानत्यमित्यर्थः ॥ ॥७६॥

३·

वसंततिलकं प्रौढाभिसारिका यथा स्फुरदुरसिजेति अथात्र प्रश्ने कथय यदि मनोरथाभिलाषो
रथो न स्यात् नभवेत् नहि स्फुरदुरसिजभारभंगुरांगी स्फुरतो यौ उरसिजौ स्तनौ तयोर्भारेण भंगुरं
नम्रं अंगं यस्याः सा युवती किसलमिव कोमला कांतिर्यस्यास्तेन पदेन चरणेन निशासु रात्रिषु कथं केन
प्रकारेण गंतुं सहेत गमनं सहा भवेदित्यर्थः पुष्पिताग्राछंदः परकीयाभिसारिका यथोदाहरंति ॥
रभसादिति हे सखि रभसात् कांतमिलनोत्कंठात् अभिसर्तुं कांतं प्रतिगंतुमुद्यतानां वनितानां
प्रौढाभि· स्फुरदुरसिजभारभंगुरांगी सिकलयकोमलकांतिना पदेन अथ कथय कथं सहेत
गंतुं यदि न निशासु मनोरथो रथः स्यात् ११ परकीयाभि· रभसादभिसर्तुमुद्यतानां वनि
तानां सखि वारिदो विवस्वान् रजनी दिवसोंधकारमर्चिर्विपिनं वेश्म विमार्गपथ ॥ ज्योत्स्ना
भिसा· चंद्रोदयेवंददनमंगकेषु विहस्य विलस्य विनिर्गतायाः मनो निहंतुं मदनोपि वा
नाम मनुरागवतीनां योषितां वा णात्करेण कौंदान्विभरांबभूव १८ रिदो मेघः विवस्वान्सूर्यः रज
नी रात्रिर्दिवसः अंधकारः अर्चिः प्रकाशकं तेजः विपिनं वनं वेश्म गृहं विमार्गः अपथः स एव मार्गः वनि
तानां नितांनास्पध्यानुरागाणां च योषितां समवः ज्योत्स्नाभिसारिका यथा तामुदाहरति चंद्रोदयइ
ति चंद्रोदये अंगकेषु प्रियविरहतनुतेन अनंकेपाणि अंगगानि अंगकानि तेषु चंदनेन विमस्या

रस.
टी.
३१

लिप्यचंद्रकिरणासमानेन न कोपि मां न ज्ञास्यतीति धियेति भावः विहस्य कांतसंगमे मनाग्मानेन सु
खयिष्यामीति उत्कंठेनेति भावः विनिर्गतायाः कांतप्रत्यभिहृतायां नायिकायामदनो मदयति
हर्षयति इत्येवंभूतोपि मनोतिहृद्गं करेणकोदानुं कुंदस्यावयवाः पुष्पाद इति कोदास्तान्वाण
त्विभगावभूवदथार ग्रेजोपजातिवृत्तं १८ दिवाभिसारिकायथेप्तदाहरतिपल्लीनामिति सद्य
जनागृहजनामिथः परस्परंकृतमहोत्साहंकृतोमहोयस्याः क्रियायां तद्यथा स्यात्तथा प्रवृत्ते ग्र
प्रस्थिताः ग्रामेत्रणगृहे चलिताः क्वसति पल्लीनामिलस्य ग्रामाणामधिपस्य स्वामिनः पंकजदृ

दिवाभिसारा पल्लीनामधिपस्य पंकजदृशां पर्वोत्सवामंत्रणे जाते सद्मजनामिथः
कृतमहोत्साहं प्ररःप्रस्थिताः सव्याजस्थितयोर्विहस्य गतयोः गुह्यांतमज्ञातेरशून्ये
स्विन्नकपोलयोर्विजयते कोप्येककंठग्रहः ८०॥ शांपद्दीशां पर्वोत्सवामंत्रणे पर्वणि चैत्रपौ
र्णमास्यादौ य उत्सव स्तदर्थमामंत्रणं तस्मिन् जाते सति अज्ञातेरसव्याजं किंचिदपदिश्य पस्थितयो
पुनर्विहस्य मनोरथावाप्त्यानंदेनेति भावः गुह्यांतमंतः पुरं गतयोः प्राप्तयोः शून्ये युवतिस्त्र
युवानयोः पुनस्तयोः स्विन्नकपोलयोः स्विन्नाः स्वेदयुक्ताः कपोला ययोस्तयोः परस्परागमन
सात्विकभावोदयादिति भावः कोप्यपलक्षितुमशक्यः कंठस्य ग्रहो ग्रहणमालिंगनमितियावत्

२
३१

सामान्याभिसारिकायथेमुदाहरति। लोलज्झोलेति वरांगनावेश्याकस्यापिकृतिनोपन्यस्यक्री
डाकुंजगृहंप्रयात्यभिसरति कथंप्रयाति इति यत्नयत्नाह लोलंतीचंचलाचोलस्य प्रच्छदपटस्य च
मत्कृतिश्चमत्कारो यस्यांक्रियायां नयथास्यान्नयथाभूतः प्रविलसंतीकांचीलतयालंकृतिः य
त्रक्रियायांयानस्तुनः संचतु गाढोयः कंचुकस्यबंधस्तेनबंधुरानम्राचलंतीमंजिनावद्दोजकुंभस्यो
न्नति यत्रक्रियायांनतत्पुनर्विस्फुरंतीयागतिस्तयाचलंतीचपलाचामीकरालंकृतिः सुवर्णालं

सामान्यवनिताभिसारिकायथा। लोलज्झोलचमत्कृतिप्रविलसत्कांचीलतालंकृतिवं
चत्कंचुकबंधबंधुरचलद्दोजकुंभोन्नति स्फूर्जद्धीधितिविस्फुरद्गतिचलच्चामीकरा
लंकृति क्रीडाकुंजगृहंप्रयातिकृतिनः कस्यापिवारांगना ८९। मुग्धायांलज्जाप्राधान्येन॥
मध्यायांलज्जामदनसामान्येन प्रागल्भायाः प्रकाशप्राधान्येनधीरायांधैर्यप्राधान्येन अ
धीराधीरायांधैर्याधैर्यप्राधान्येनज्येष्ठायास्नेहाधिकप्राधान्येन कनिष्ठायाःस्नेहप्राधा
न्येन परोढायासंगुप्तिप्राधान्येन मुग्धायाइवकन्यायाःसामान्यवनितायाधनप्राप्तिप्रा
धान्येन अष्टविधनायिकावर्णनं इतिशेषः॥ कोशेयत्रक्रियायांनत्सर्वोपिपरिक्रियाविशे
षणानिबंधुबंधुरेणसनमेचेतिविश्वः शार्दूलं ८१। काचिदग्निमत्तगाकारिष्यमाणागमनकाल

रस· वियोगविक्लवा नायिका जीवितं प्रति वदति हे जीवित प्रियतमे प्राप्ते देशान्तरं गन्तुं निश्चित
टी· चेतसि निश्चितं चेतो यस्य तस्मिन् प्रियतमे सति सर्वैः समकालमेव प्रस्थिता चलिता लोके नत्राह
३२ प्रियसखैः प्रियाश्रुते सखायश्च समीपवर्तित्वात् तैर्वलयैः कङ्कणैः प्रस्थानं कृतं तत्क्षणमेव
32

प्रस्थानं बलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गं
न्तुं पुरः पापं निश्चितचेतसि प्रियतमे सर्वैः समं प्रस्थिता गन्तव्ये सति जीवित प्रियसुहृत्
सार्थः किमु त्यज्यते ८२" इत्यादि प्राचीनग्रन्थकारलेखनात् अग्रिमक्षणे देशान्तरं रनि
श्चितगमने प्रेयसि प्रवत्स्यत्पतिकापि नवमी नायिका भवितुमर्हतीति तथाहि। न तस्याः
प्रोषितपतिकाविप्रलब्धोत्कण्ठिकास्वन्तर्भावः भर्तुः सन्निवर्तित्वात् न कलहान्तरिताया
मन्तर्भावः कलहाभावादनवमानित्वाच्च नापि खण्डितायामन्तर्भावः प्रियस्यान्योपभो
गचिह्नितस्यागमनाभावात् प्रियायाः कोपाभावदर्शनाच्च कामभावात्।

क्षीणत्वप्राप्त्या धातोर्निर्गतमित्यर्थः पुनः श्रुहैः रुक्मैः अश्रुभिर्वातजस्रं निरन्तरं गतं विरहशोषितत
त्वादिति भावः यद्वाश्रुसैश्चसुभिः अजस्रं सततं गतं चलितं पुनर्धृत्या धैर्येण तत्क्षणमपि नासितं न ३२
स्थितं पुनश्चित्तेन पुरोऽग्रतः प्रगन्तव्यवसायउद्यमः कृत इत्यर्थः ८२

विवक्षितमाह गतेष्वमतिप्रियविनाश्यान्तमशक्यत्वादित्यर्थः प्रियसहदंदासार्थःसंघातः

सज्जीकरणाभावनिर्वेदादिदर्शनाच्च नापि स्वाधीनपतिकायामंतर्भावः अग्निमत्त
णपर्वसंगविच्छेददर्शनात् नहि स्वाधीनपतिकायाः कदाचिदपि संगविच्छेद इति संप्र
दायः अजस्रमपि पतिः स्वाधीनपतिकयानिरुध्यते अन्यथाभंगेहि स्वाधीनपतिकात्वमे
वतस्याभज्येत नेह तथा सर्वथाभर्तुः विदेशगमनात् किंचिन्निर्वेदासूयादिभिः स्वाम
त्वात् नवविहारमदनमहोत्सवव्यतिरेकदर्शनाच्च नापि अभिसारिकयामंतर्भावः
अभिसारोत्सवाभावात् अनलापदर्शनाच्चेति युक्तमुत्तमप्रेमः ॥ लक्षणंतु यस्याः
पतिरग्निमत्तणोदेशांतरंयात्येवसाप्रवत्स्यत्पतिका अस्याश्चेष्टाकाकुवचनकातरे
प्रेक्षणागमनविघ्नोपदर्शननिर्वेदसंतापसंमोहतिःश्वासबाष्पादयः ॥

किमु विनर्के उत्सृज्यते परित्यज्यते सार्थान्तरत्वात्नविलम्भो वनेयेत्यर्थसार्थःसंघातमात्रकइति
विस्मः शार्दूलहतं ५ ।

रस० टी० ३३

33

तत्र मुग्धां प्रवत्स्यत्पतिकामुदाहरति प्राणेश्वरेति तामोदरी कृशोदरी नायिका प्राणेश्वरे कांते
निर्गमनाय प्रमाणाय किमपि किंचिदपि जल्पति सति वदनमानमयांचकार लज्जया वक्त्रमध
कृतवादिति भावः पुनः आली सखी निभृतमंदंतिकुंजमेत्य प्राप्य उन्मत्तकोकिलध्वनिं आततान
चकारेत्यर्थः मत्तकोकिलपंचमध्वनिमाकर्णाय एवं मत्वागमं ज्ञात्वा विरहकातरतया न प्रया
स्यतीति बुद्ध्येत्यर्थः वसंततिलकं छंदः ८२ मध्यां प्रवत्स्यत्पतिकामुदाहरति गंतेमितिप्रि

मुग्धा प्रवत्स्यत्पतिका यथा प्राणेश्वरे किमपि जल्पति निर्गमाय तामोदरी वदनमा
नमयांचकार आली पुनर्निभृतमेत्य लतानिकुंजमुन्मत्तकोकिलकलध्वनिमातता
न ८३ मध्या प्रवत्स्यत्पतिका यथा गंतेति प्रिये वदति निःश्वसितं न दीर्घमासीन्नवानय
नयोर्जलमाविरासीत् आयुर्लिपिं पठितुमेणदृशः परंतु भालस्थली किमु कचैः समु

पेगंतेति वदति प्रियसति मृगदृशा नायिकाया दीर्घं निःश्वसितं नासीत् मृगदृशा इति पदं कांतर
त्वेनेति भावः नवाननयनयोर्जलमाविरासीत् प्रकटीबभूव विरहजनितदुःखेनेति भावः परंतु
कचैः केशजालैर्विकचवचनं किमभवितव्यं आयुर्लिपिं आयुरक्षराणि पठितुं भालस्थली ललाटप्रदे
शं समुपाजगाम आयुर्लिपेस्तत्र विद्यमानत्वादित्यर्थः वस्तुतस्तु सशापिके शवहिका विरहचिंतया

३३

प्रोषितप्रवत्स्यत्पतिकामुदाहरति नायं मुंचतीति भो पंकजपते कस्मात्तनुत्यागेपि अयं वियोगज्वरः
सुभ्रुवां स्त्रीणां न मुंचतीति नेह तेन नाविदितांजलिरहं पृच्छामि मत्स्यपत्यार्थं वद किं तदित्याह तांबू
लकुसुमं पुष्पं पटीरं चंदनं उदकं यद्धत्पुर्भिदीयते मृतोद्देशेनेत्यर्थः तत्सर्वमेतैव दहयत्येत्यर्थः
यत्स्वर्गेपि किमु ज्वालावलीदुःसह अग्निज्वालावलीवदुःखेन सह्यत इति किं तथैव दाहकं भवती
त्यर्थः पटीरो वाति केके नीरंगगम्भूले चचंदन इति विश्वः शार्दूलछंदः ॥ परकीयाप्रवत्स्यत्पति
प्रोषिताप्रवत्स्यत्पतिका ॥ नायं मुंचति सुभ्रुवामपि तनुत्यागे वियोगज्वरस्तेनाहं विदितां
जलिर्यदुपते पृच्छामि मत्स्यं वद तांबूलकुसुमं पटीरमुदकं यद्धत्पुर्भिदीयते स्यादेतेनैव परत्र
तत्किमु विषज्वालावलीदुःसहं ८५ परकीयाप्रवत्स्यत्पतिका। त्यक्तं पन्नगमूर्द्धिपा
दयुगलं भक्तिर्विमुक्ता गुरोः त्यक्तानीति कुतश्चित् किंन्न भवतो हेतोर्मया दुष्कृतं अंगानां श
नयातनानयनयोः कोपि क्रमो रौरवः कुंभीपाकपराभवश्च मनसो युक्तं तथापि प्रोषिते
कामुदाहरति त्यक्तमिति काचित्कांतं प्रतिवदति हे कांत पन्नगमूर्द्धि पन्नगानां सर्पाणां मार्गमा
मानामित्यर्थः मूर्द्धि मस्तके पादयुगलं यस्तं तद्दर्थे कालोपि नगराज्ञा तद् इति तात्पर्यार्थः किंच
गुरोः श्वश्रुरादेर्भक्तिर्विमुक्ता तद्दर्थ इत्यर्थः पुनर्नीतिः कुलमर्यादा त्यक्ता भवतो हेतोर्मया किं

रस· नतुक्षतमत्कारिक्षतंस्थापितुसर्वमपीत्यर्थः त्वयिप्रस्थितेसतियुक्तंपतद्धृदयमाणमि
त्यर्थः यद्वाहृदृष्ट्रिवलोमृगः हृदोरयंरोरवःकुम्भःपातःतद्धनादागमनपर्यंतंत्वामेजीवि
टी· तंयास्यतीत्यर्थः चपुनः कुंभीपाकपराभवः कुंभीपाकनरकवत्पीडाचेत्यर्थः यद्वाकुंभ्यां
३५ कलशेपाकोविक्लेदस्तद्वत्पराभवः यथाग्निनाकुंभ्यांपच्यतेतथाविरहाग्निनात्मायाम
34 त्तेनोमनसोव्यथाभविष्यतीत्यर्थः शार्दूलछंदः ८९ देशपाप्रवत्स्यत्पतिकामुदाहरति ॥

सामान्यवनिताप्रवत्स्यत्पति मुद्रांप्रदेहिवलयायभवद्वियोगमासाद्ययास्यति
बहिः सहसाद्यदेतत् इत्थंनिगद्यविगलन्नयनांबुधारावारांगनाप्रियतमंकरयो
र्बभार १८ इतिप्रवत्स्यत्पतिकासमाप्ता· अहितकारिण्यपिप्रियेहितकारिणी
उत्तमाधमसाउत्तमैवचेष्टात्रयथा ॥

मुद्रामिति वारांगनावेश्याविगलन्नयनांबुधाराविगलंतीनयनांबुधारायस्याःसाइत्यमने
नप्रकारेणनिगद्यप्रियतमंकरयोर्बभारदध्रेइत्थंकथंहेप्रियवलयायवलयंकंकणंयद्वि
तमित्यर्थः मुद्रामंगुलीयकंप्रदेहियेदनद्वलयंभवद्वियोगमासाद्यप्राप्यसहसाअकस्मिक ३५
बहिर्यास्यतिप्रतिष्ठतीत्यर्थः वसंततिलकंछंदः ७० ॥

पतिरितिवामभ्रुवावामेमंदर्श्यैर्भ्रुवौयस्याः सातया कुचविचित्रितोरःस्थलः कुचाभ्यांविचित्रि
तंसपत्न्यालिंगनेनतिभावः उरःस्थलंयस्यसः एवंभूतःपतिःशयनंशय्यामागतःप्रसन्नानि
यानिवचनानितान्येवामृतानितैरनर्पिप्रीणितः पुनःसुभगायाःस्मितद्युतयस्तएवपटीरपंकद्रवाः
चंदनकर्दमरसास्तैश्चर्चितःचर्चितः पुनर्विलसंतीविलोचनेनयोश्चमत्कृतानिकोणछटाविशेषा
स्तान्येवइंदीवराणिनीलकमलानितैरपूजिःपूजितः निष्कपटत्वादेहिकद्वौरेवसमानितः

पतिःशयनमागतःकुचविभैरपूजिविलसद्विलोचनचमत्कृतेरीवैरंबुजेः ८

चित्रितोरःस्थलःप्रसन्नवचनामृतैरयमतर्पिवासभ्रुवा चर्चितःसुभगास्मितद्युतिप
टीरपंकद्रवैरपूजिविलसद्विलोचनचमत्कृतैरंबुजैः ८८ हिताहितकारणिप्रिय
तेमद्दिताहितचेष्टावतीमध्यमा । अस्यास्तुयथाविस्तानुसारिणीचेष्टायथाकांतेसागसि
कंचुकस्पर्शिनयासाचीकृतग्रीवयामुक्ताः

पतिरित्यस्यउत्तरत्वेचमत्कृतैरंबुजैरित्यस्यमीचतिःपाठोमसंजसत्वात्तामंसद्देोप्रतीयेचद्रवि
णोचापिसंदरहृतिविरुद्धः इत्यौचिंत्यः ८८ अथमध्यमाहितकारिणएपीतिचेष्टांतस्यश्यथ
स्तदाहरति कांतातिसागसिसापराधेकांतेकंचुकस्पर्शिकंचुकंस्पृशतीत्तितस्मिंमतिः॥

र॰म॰ साचीकृतग्रीवयासाचीकृताग्रीवाययातेनापिकयाकोपेनकषायाईषद्रक्तामन्मथशा
टी॰ रवत्क्रूराः कटाक्षांकुराः नागरिकाणांनागतविश्रान्तिरूपावलोकनछटामुक्ताः प्रेरिताश्च
पुनः साकूतेसाभिप्रायेचाटुकारिणिसतीत्यर्थः समुद्भूतासोमनेमुद्भूतायस्याः साकाचन
34 ३४ अपूर्वाकल्पलताप्रीतिमनोरथसंपादकत्वात्कल्पलतेत्युक्तंमहादानीकृताप्रीतेरधिका
35 ३५ त्वेनदानस्यमहत्त्वंकिंभूताप्रीतिः दरईषद्धासएवकिंजल्कः केसरोयस्मिन्नेवंभूतंपयद

कोपकषायमन्मथशरवत्क्रूराः कटाक्षांकुराः साकूतेदरहासकेसरवचोमाध्वी
कधारालसाप्रीतिः कल्पलताचकाचनमहादानीकृतासमुद्भूता ८२ हितकारि
ण्यपिप्रियेअहितकारिण्यपथमापथ्येवतिनिर्निमित्तकोपनाचंडीत्यवधीयतेअस्या
निष्कारणकोपत्वादधमैवचेष्टा॥ वोस्तुदेवमाध्वीकंमधुतस्यधाराप्रवृत्तिस्तयाअल
सानिर्भराकल्पलतापिमधुररसयुताभवति दरहासेकेतिप्रियविशेषणात्दरोहासोयस्मिं
स्तैसामाधुर्यादिस्तयुक्तंवचइति स्वाख्यानेप्रियहासस्यानुपयुज्यमानत्वादसमंजसं शाईह
ते ८९ अथाधमाहिताहितकारिण्यपीतिचेष्टांतस्पष्टं तत्रचंडीकोपनस्त्रीषुसमनेतिविश्वः

३४

हे सखि यो नायकः प्रस्थाने पुष्पत्रोटनादिनिमित्तगमनेन तव मुखांभोरुहे सकमले कमलेनछा
याकरोति त्वन्मुखस्यातपत्राधाभीत्येतिभावः पुनः शिशिरया शीतलया श्रीखंड इव सरसचंदन
रसस्य धारया पुरोगे मार्गे सिंचति तस्मिन्प्रेयसि अतिशयप्रिये भूयः पुनः दृशा कुध्यसि क्रोधं प्रक
टयसीत्यर्थः किंभूतया दृशा विद्रुमेति विद्रुमाणां इवोनिकरस्तस्य पानदीनस्यारिंगंतस्खलं तोये
तरंगास्तेषां भ्रमिभ्रमः आवर्त्त इति यावत् तस्मिन् भ्रांतयत्सरोजपत्रं मदृशा विद्रुमसमानया

तद्यथा प्रस्थाने तव यः करोति कमलछायां मुखांभोरुहे श्रीखंड इव धारया शिशिरया
मार्गे पुरः सिंचति तस्मिन्प्रेयसि विद्रुम इव नदीरिंगत्तरंगभ्रमिभ्रांतलोलसरोजपत्र
सदृशा भूयो दृशा कुध्यसि येषैव निर्निमित्तप्रकोपना चण्डीत्यभिधीयते प्रस्थानिष्का
रणाकोपनादधमैव चेष्टा ४० विद्रुमो रलकोदंडे प्रवाले चापि पल्लवे इति विश्वः स्याद्दावर्त्तो
भमाभ्रम इत्यमरः शार्दूलछंदः ४१ अथ मंडनमुदाहरंति स्तनकनके तिकमलमसखी नायिका क
मले लीलाकमले सखीजयानको तु केन ताडनं चकारेत्यर्थः किंभूतां सखीं स्तनेपव कनकस
हीधरः स्वर्णापर्वतस्तस्योपकंठे तत्समीपे मकरिकायामिषात् तोजातुहलसत्समोदं उल्लसत्स

रस: मोदोयस्यतं सपुलकं इत्यर्थः प्रियस्य करपल्लवं रहसि पक्कां तेलिखंती पुष्पिताग्राछंदः ९१
टी. श्रेष्ठापालंभमुदाहरति सांद्रध्वानैर्निरंतरध्वानिभिः मुखरितादिशोयाभिस्ताः श्लोकयदानां श्रेणयः
पंक्तयो सायाधारासारैः धाराणां सारैः सृपातैर्धरणीवलयं भूमंडलं सर्वतः प्लावयंति ९१ तेना
35 ३५ क्रेहे त्वनामत्सखीयुक्तमेव विपुलं महांतं स्नेहं वहति मद्वियोगमशक्नुवन् कांतामेघावलोकेन
36 ३६ विस्तरभियाप्रत्येकमेतामामुत्तममध्यमाधमभेदेनोदाहृताइतितिः श्वासविश्रामका
रिणी पार्श्वचारिणी सखीनस्यामंडनोपालंभशिक्षापरीहासप्रभृतीनि कर्माणि मंडने
यथा स्तनकनकमहीधरोपकंठे प्रियकरपल्लवमुल्लसन्प्रमोदं रहसि मकरिकामिषा
लिखंतीकमलमुखीकमलैःसखीजघान ९१ उपालंभोयथा। सांद्रध्वानैर्मुखरित
दिशः श्रेणयस्तोयदानांधारासारैर्धरणीवलयं सर्वतः प्लावयंति तेन स्नेहं वहति
विपुलं मत्सखीयुक्तमेव त्वंनिःस्नेहो यदसि तदिदं नाथमे विस्मयाय ९२॥
नसमागमिष्यतीति मेत्वतिभावः त्वंनिःस्नेहः स्नेहरहितः तदिदं मेममविस्मयाय आश्चर्यायतत्रा
शेजनेभवानेवइतिविस्मयस्यार्थः मंदाक्रांताछंदः ९२॥

अथ शिक्षामुदाहरति सानंदमिति काचित्सखी वदति हे आलि सखि वनमालि विलोकनाय श्री
कृष्णदर्शनाय सानंदं यथा स्यात्तथा कुंजे निर्गच्छ किं त्विति विचारयेथाः विचारं कुर्वीथा इति किं त
दाह ऊंकारिणो ऊंकारध्वनियुक्ता मधुलिहो भ्रमराः दिनेषु भ्रमंति पुनः रात्रौ चपलाति चंचुपुटा
नि येषां ते चकोराः चंद्रिकाप्रिया भ्रमंतीत्यर्थः तेन सायंसमयो यातेयं गच्छतीति तात्पर्यार्थः वसंतति

शिक्षा यथा सानंदमालि वनमालि विलोकनाय निर्गच्छ कुंजमिति किं त्वविचारयेथाः
ऊंकारिणो मधुलिहो दिवसे भ्रमंति रात्रौ पुनश्चपलचंचुपुटाश्चकोराः ८२ परिहासो।
यथा आगारभित्तिलिखितानथ निवेदयस्व कः सप्तमो दशसु मूर्तिषु लोकभर्तुः इत्थं सखी
जनवचः प्रतिपद्य सद्यः सीतास्मितं नवघनं निभृतं चकार ८३ ।।

लकं छंदः ८२ परिहासमुदाहरति आगारेति सीता जानकी इत्थं सखीजनस्य वचः प्रतिपद्य प्राप्य स
द्यस्त्वर्थः स्मितं नवघनं निभृतं चकार हासकांतिभिः घनं सांद्रं नवनीतमित्यर्थः इत्थं कथं आगारं गृहं
तद्भित्तिलिखितान् लोकभर्तुः भुवनपालस्य श्रीकृष्णस्य दशसु मूर्तिषु सप्तमः कः किंनामेत्यर्थः
निवेदयस्व कथय सद्म भवनागारं मंदिरमित्यमरः वसंततिलकं छंदः ८३ प्रियस्येत्यादिना ।।

प्रियायाःपरिहासंयथेत्युदाहरति दिव्यमिति शैलभुवापार्वत्यास्यविहस्योल्लपितः उक्तः शंभुर्वः शिवाय
कल्याणायास्त्वित्यर्थः कथं दिव्यं त्रूपमाप्यथवा टेनहारं निहूत्वा नं प्रतिवदति हे शंभो वारि जलं दिव्यं श
पथ्यविशेषः कथं यत स्तव मौलौ मस्तके स्वर्धुनीयः शिरसि गंगां वहति तस्य कथं जलं दिव्यमित्य
र्थः पुनः अहिः सर्पः कुर्यादिदं कथं यत स्तव तद्विलोचनं यो नेत्रेणाग्निं वहति तस्याग्निः कथं दिव्य
मित्यर्थः पुनः पावकोग्निर्दिव्यं अहिः सर्पः कथं दिव्यं सर्वाहिस्तवाङ्गे यः सर्पालंकारस्तस्य कथं सर्प
दिव्यमित्यर्थः तस्मात् घृतविधौ त्वया प्रमुषितस्त्रीति ते हारः परित्यज्यतामिति शार्दूलमिति सर्वो

प्रियस्य परिहासवशात्प्रियायाः परिहासः यथा दिव्यं वारि यतः कथं स्वर्धुनी मौलौ कथं पावको
दिव्यं तद्विलोचने कथमहिर्दिव्यः सर्वाङ्गे तव तस्मात् घृतविधौ त्वया प्रमुषितो हारः परित्य
ज्यतां इत्थं शैलभुवा विहस्योल्लपितः शंभुः शिवायास्तु वः ९२ इत्यत्यापारपारगमाहृतीन
स्याः सञ्चटनाविरहनिवेदनादीनि कर्माणि यथा प्रवतिरजनिरुदंचनि तिमिरमिदं इति
वेचति मनोभूः उक्तं न त्याजयुक्तं विरचय रक्तं मन स्तस्मिन् ९३॥ निर्व्याप्य हृन्नीदर्शयति इत्ये

तिहृतस्य भावः इत्यत्र नवरीणाम्भोरुहे त्रणाभावे यत ततआपारे पारं गच्छतीति पारंगमा तस्या इति सञ्चटने
हयोर्मेलने यथेत्युदाहरति प्रवतीति काचित्कामानयनं कृतं प्रतिसाहसी प्रतिवदति हे हृति रजनिः रात्रिः
प्रवर्तिप्राप्नोतीति तिमिरमंधकारमिदमुदंचति उद्गच्छति मनोभूः कामः वेचति त्यजतीति युक्तं यत उक्तं तद

रसः ३८ श्रीः आर्याछंदः विरहनिवेदने यथेत्युदाहरति॥
मनोरक्तं प्रीतियुक्तं विरचय प्रसद्यात्तस्मिन्नित्यर्थः

37

२८ पौंकरणामित्यर्थः तस्य जनतिस्मेरत्यर्थः तस्मिन्नुक्ते

चक्र इति हे कुरंगस्य तथा त्राव्रह्मलावण्यपरामंडले चंद्रमुखी राधिका प्रदीपकलिकादीपज्योतिः चक्रे क्रियते
स्मृताव नाकिं न त्राह न संगत धायां दैववशात् चरमापि शृंगतिमापि दशावस्थां गता वस्येत्यर्थः दीपपते
दशावर्तिः प्रायेवाहू ल्पेन समुन्मीलति सस्य गुदेति नत्पनेता हेतोर्नेतेन नमेत्राणाशिरसा उपलक्षिता ब्रू
मः सर्वाश्रयिमिलिता निवेश्यामः इत्यर्थः सहसा श्राकस्मिकं तत्र राधा रूपकलिकायां तथा तेन प्र
कारेण स्नेहः प्रेम निक्षिप्यतां यथा त्रैलोक्यमंथनमो न भवति भवत्स्नेहं विना सर्ववस्तूनि विश्वप्रकार

विरहनिवेदनं यथा चक्रे चंद्रमुखी प्रदीपकलिका धात्राधरामंडले नंदैववशादशापि
चरमा प्राय: समुन्मीलति तद्भूमः सहसान नेन नाशिरसा श्रीकृष्ण निक्षिप्यतां स्नेहस्तत्र यथा न
थान भवति त्रैलोक्यमंथनमः शृंगारस्योभयनिरूप्यता नायकस्त्वावत्त्रिरूप्यते स च त्रिविधः
पतिरूपपतिर्वैशिकश्च विधिवत्पाणिग्राहकः पतिः स च यथा त्वं पीयूषमयूषमंसुचणिभाग्यन्
स्निग्धान्स्तथा शीकरान्त्वं भोगीन्द्र विलंबसे किम् फणाभोगैः शनैर्वीजयन् त्वं वाहिनि किं
सिंच सलिलैरंगैः शिरीषोपमैः सेयं शैलसुता कठोरसदृशः कोप्यायथिक्लाम्यति ॥

तल्पं तस्या भवतीत्यर्थः दीपपदे स्नेहस्तैलं यथा तैलाभावे निर्वाणं याति चरमा तस्यापि दीपज्योतिस्ते
लदानेन प्रकाशेत इति शार्दूल १९ पतिमुदाहरति त्वमिति शिवो वदति हे पीयूषमयूख पीयूषममृतं
मयूखाः किरणा यस्य सः तत्संबोधनं अमृतकिरणांश्चे इति पि शिशिरः शीतलाः स्निग्धाः सांद्रास्तान्

२स· सुधायाममृतस्यशीकराः कणास्तैश्च हे भोगीन्द्र सर्पराज किमु विलंबसे किं त्वफणानां भोगैर्विस्तारैः श्वा
टी नैर्वीजय वायुं जनेत्यर्थः किंच भोः स्वर्वाहिनि स्वर्गंगे त्वं सलिलैः सिंचयतः शिशिरैर्बाष्पैः शिशिरैर्बहुध्य
नस्यैर्गेरुत्पलहितत्वसाउयु शैल सनापार्वतीकठोरसहस्रः उस्रतेजसः सूर्यस्येत्यर्थः कांस्यायायाश्चमा
३७ गैर्ल्लाममतिग्लानिं प्राप्नोति पीयूषममृतसहयेत्यमरः स्निग्धं त्वमस्यृणोस्माद्दे इति शब्दार्णवः शार्दूलवृत्तं ।
३८ ३७ अथ पतिविभक्तेनेत्यनुकूलत्वादिना तत्रानुकूलं दर्शयति सर्वकालीनेति सर्वकालेभवः सार्वका
लिकं सर्वकालमनुरक्तः कदापि न विरक्तः इत्यर्थः शाठ्यस्पृष्ट यथेति दर्शयति हृष्टीति सीतयास

अनुकूलदक्षिणधृष्टशठभेदात्पतिश्चतुर्विधः सर्वकालपरांगनापराङ्मुखत्वे सति सर्वकाल
मवरक्तोऽनुकूलः यथा हृष्टित्वं भव कोमलादिनमणे त्वं शैत्यमंगीकुरु त्वं वर्त्म च लघुतां प्रया
हि पवन त्वं खेदमुत्सारय मा विन्ध्याश्रय दंडकाननगिरे निर्गमाद्गाद्बहिः सीताम्भो विपिने मया
सह यतो निर्गतमुत्कंठते ।

हंसप्रस्थितः श्रीरामो वदति हे पृथ्वि त्वं कोमला भव सीतायाश्चरणकमलयोरतीव कोमलत्वात् हे दि
नमणे सूर्य त्वं शैत्यं शीततामंगीकुरु उस्रतापरिहरेत्यर्थः हे वर्त्म त्वं मार्ग त्वं लघुतामल्पतां प्रयाहि
प्राप्नुहि हे पवन वायो त्वं खेदं श्रममुत्सारय दूरीकुरु हे दंडकाननगिरे च दंडकारण्यस्थाधिष्ठित अ
रण्य वनं दंडकारण्यमित्यर्थः तत्संबंधिन् गिरे क्रमेण मा विन्ध्याश्रय न कुरु संकुचितो भवेत्यर्थः किंच मागा
द्बहिर्निर्गमार्गं परित्यज दूरे तिष्ठेत्यर्थः यतः सीता मया सह निर्गतमुत्कंठते वाञ्छतीत्यर्थः शार्दूल
वृत्तं ३८ ॥ ३७

अथ दक्षिणं दर्शयति सकलेति सकलनायिकाविषयकः समसहजानुरागो यस्य सः यथेति मुदा
हरति एतदिति गोपीजनमध्यसंस्थमात्मानं निरीक्ष्य श्रीकृष्णः सखायं वदति एतस्य मृगदृशां सुन्दरीणां स
हस्रपरोरम्भे स्फुरति प्रकाशे न कुत्र कस्या विषये अस्ति हृदयं निवेशयामि न कथय समानुरागा हेतोः सनेत्रद्व
यं युगपन्निवेशयामिति विप्रतिपत्तौ प्रश्नः इत्याकलय्य विचार्य रोमांचितेन वपुषा उपलक्षितेन अच्युते
न कृष्णेन नयनाम्बुरुहे नेत्रकमले निमील्य स्थितं न किंचित्कथनमित्यर्थः एतेरेकत्रानवस्थायितानी र
मन्तं चिंत्य तथाच गीतगोविंदे श्लिष्यति कामपि चुंबति कामपीत्यत्रापि नीरमन्तं वसन्ततिलकं ९२

सकलनायिकाविषयसमसहजानुरागवलितो दक्षिणो यथा एतस्याः स्फुरति मृगदृशां स
हस्रमस्ति हृदयं कथय कुत्र निवेशयामि इत्याकलय्य नयनाम्बुरुहे निमील्य रोमांचितेन वपुषास्थि
तमच्युतेन ११ भूयो निःशंककृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः यथा।
बद्धो हारैः करकमलयोर्द्वारदेशे निवारितोऽपि स्वायत्तस्तावत्पुनरुपगतो हरतो दस्मर हृष्टः

अथ धृष्टं दर्शयति भूय इति कापि सखी वदति भूयो वारंवारं निःशंकं यथा स्यात्तथा कृतदोषोऽपि कृताप
राधोऽपि भूयो निवारितोऽपि नागन्तव्यमित्यादिना वचनेन भूयः प्रश्रये विनये परायणो दत्तमना इ
त्यर्थः यथेति धृष्टमुदाहरति बद्ध इति मया हारैः करकमलयोर्बद्धोऽपि पुनर्द्वारगेहाद्द्वारदेशे निवारितोऽपि स्वा
यत्तं तावत्पुनरुपगतः समीपं प्राप्तः ननु दूरतो हृदत्तापप्रेरितो दृष्टिपथं न गमः सद्भावं ज्ञातुमिच्छतीति
भावः।

रस. पुनस्तल्पोपांते शय्यासमीपे मुक्तं स्थापितं कनकवलयं राज्ञो नालंकृतः स्वप्यादित्यागमोक्तत्वादिति
भावः यद्वा मुक्तं पदच्युतं स्थापितं विरहेण कृशत्वात्पतितमित्यर्थः अन्विषयंत्या अन्वेषणं कुर्वंत्या मया पा
टी. पार्श्वप्रसुप्त एव धृष्टो दृष्टः मंदाक्रांता छंदः ॥ अथ शठं लक्षयति कामिनीत्यादि स्पष्टं यथेति
३८ शठमुदाहरति शठ इत्यध्याहारः मौलौ शिरसि दाममाल्यं विधाय कृत्वा पुनर्भालफलके पत्राव
३९ लीमालिख्य पुनर्भुजयोः केयूरं निधाय पुनः कुचयोर्मुक्तास्रजं विन्यस्य मृगदृशो नायिकाया वि

तल्पोपांते कनकवलयं मुक्तमन्वेषयंत्या दृष्टो धृष्टः पुनरपि मया पार्श्व एव प्रसुप्तः १२॥
कामिनीविषयकपटपटुः शठः यथा मौलौ दाम विधाय भालफलके आलिख्य पत्रावलिं
केयूरं भुजयोर्निधाय कुचयोर्विन्यस्य मुक्तास्रजं विश्वासं समुपार्जयन्मृगदृशः कांचीनि
वेशछलान्नीवीग्रंथिमयाकरोति मृदुना हस्तेन वामभ्रुवः १३

श्वासं समुपार्ज्य उत्पादयन् कांचीनिवेशछलात् कांच्याः क्षुद्रघंटिकाया निवेशाय यथास्थानप्र
वेशनच्छलात् तद्व्याजात् मृदुना शनैः शनैः करणान्नृपेण हस्तेन वामभ्रुवो वक्रभ्रुवो नीवीग्रं
थिमयाकरोति रंतुमिच्छया परिहरतीत्यर्थः नायकस्यात्र ममध्यमाधमत्वेन दक्षिणशठधृष्टा
इति निरूपनीयत्वेन मुत्क्रमस्तु धृष्टः शठश्च समीचीनः शार्दूलवृत्तं १३॥ ३८

पश्चाल्लभ्य उपपतिश्च तथा च तल्लक्षणाकारः अनुकूलादिभेदैरित्यर्थः परं तु शठ त्वं तत्र तेषु नियतं निश्चि
तं परे ऽनुकूलादयोऽनियताः अथ वैशिकं दर्शयति वल्लेति अंबरं बहुलं वाहित्यमरः यथेति तन्मुदा
हरति कांचीति कस्मिन्नत्र एवायं वदति वारविलासवत्या वेश्यायाः कमपि अनंगरंगकामविलासभाषा
स्म हे वा छामः किंभूतमनंगरंगं कांच्याः कलक्वणितेन मधुरास्फुटध्वनिना कोमला मधुरा नाभिः कांति
यस्मिंस्तु पुनः पारावतानां ध्वनितेन कूजितेन विचित्रितांकपाली यत्र नानाविधरतिकूजितं चातुर्यादि
तिभावः पुनः उद्भ्रांतौ लोचनकोरौ यत्र नतं सम्मुखचंद्रचंद्रिकायानार्थमितिभावः वसंततिलकछंदः १४

आचारहानिहेतु उपपतिर्यथा शंकाश्रृंखलितेन यत्र नयनप्रांतेन न प्रेक्ष्यते केयूरध्वनिभूरि
भीतिचकितेनाऽयवाश्लिष्यते नो वा यत्र शनैरलग्नदशनैर्बिंबाधरः पीयते नो वा यत्र विधीयते चम
णितं तत्किं रतं कामिनोः १५ ॥ सोपि चतुरः परं तु शठ तत्र नियतमनियता परे उपपतिर्यथा ॥
आदौ उपपतिं लक्षयति आचारेति आचारस्याम्नायदर्शितः मार्गस्य हानिहेतुरित्यर्थः उपपतिमु
दाहरति शंकाश्रृंखलितेनेति कामिनी च कामी च कामिनौ तयोः तत्किं रतं अद्भुतमित्यर्थः तदेवा
यत्र रते शंकया श्रृंखलितेन बद्धेन नयनप्रांतेन न प्रेक्ष्यते यत्र वा रते केयूरध्वनिना भूरि अधिकं या
भीतिस्तया चकितं यथा स्यात् नो आश्लिष्यते नालिंग्यते यत्र वा अलग्नादशनादंता यस्मिन् ह्यत्रेदलग्नदश

रस.
टी.
39 ३९
40 ध:

नं यथा स्यात्तथा शनैर्मंदं मंदं विंबाधरं नीपीयते यत्र वामगीर्णानं रतिकूजितं न विधीयते न क्रियते
प्रछन्नकामित्वादितिभावः शार्दूलवृत्तं १४ वैशिकं विभजते वैशिकस्त्विति स्पष्टं यथेति नमुदा
हरति कांतः यत्कमलदृशः प्रशस्तानि यत्नानि यस्यास्तादृशी दृग्यस्यास्तस्या नायिकायाः श्रोणा
रविंदश्रियं श्रोणारविंदस्य रक्तकमलस्य श्रीः शोभा यस्मिन्न् तं कोपोदयेनेति भावः नेत्रं शांतमुदी
उपपतिरपि चतुर्धा पंचनशाठत्वं तत्र नियंतस्यति यत्नाः पर बहुलवेश्योपभोगरसिको
वैशिकः यथा कांचीकलक्वणितकोमलनाभिकांतिं पारावतध्वनिविडंबितकंठपालिं
उद्भ्रांतलोचनचकोरमनंगरंगमाशास्महे कमपि वारविलासवत्याः १५ वैशिकस्तूत्तममध्य
माधमभेदेन त्रिविधः दयितायाः भूयः प्रकोपेप्युपचारपरायणा उत्तमः यथा चक्षुः शांतमु
दीक्ष्य यत्कमलदृशः श्रोणारविंदश्रियं नोद्वेजैर्जल्पति न स्मितं वितनुते गृह्णाति वीटीं न वा
तल्पोपांतमुपेत्य किंतु पुलकभ्राजत्कपोलस्थितिः कांतः केवलमानतेन शिरसा मुक्तास्रजं
स्य ऊर्ध्वं दृष्ट्वा उद्वेगरधिकं न जल्पति स्मितं हास्यं न वितनुते विस्तारयति न वा वीटीं गृह्णाति किंतु
तल्पोपांतं समीपमुपेत्य प्राप्य पुलकैर्भ्राजंती कपोलयोः स्थितिर्यस्य सः केवलं परं यथा स्यात्तथा
आनतेन शिरसा उपलक्षितः मुक्तास्रजं गुंफति ग्रथ्नातीत्यर्थः शार्दूलवृत्तं १६ ॥

३९

मध्यमं लक्षयति प्रियायाः इति स्पष्टयथेति तमुदाहरति आस्यमिति यद्यपि इदमास्यं हास्यवर्जितं पु
नर्लास्येन पीनादिनाव चोवचनं वीतरहितं पुनः शोणाम्भोजस्य कान्तिर्यस्मिन् तन्नेत्रं कोपेनेति भावः
तदपि क्षापि प्रदेशे च्चरणं त्वया स्थीयतां कोपं पदं त्यज्यमहृद्देशप्रदेशे विश्वस्यतामित्यर्थः यतः सदश
स्तवसायतनः संध्याभव इति सर्वत्र योज्यं मालायाः करणोद्यमो दृश्यते पुनः कुचाभोजयोर्मकरिका
रंभः चित्ररचनाविशेषः आभोगो विस्तारः पुनः कुंतलयोरणीषु केशसमूहेषु धूपः अगुरुचंदना

प्रियायाः कोपेयः प्रकोपमनुरागं वा न प्रकटयति चेष्टेनाभावं गृह्णाति स मध्यमः यथा
आस्यं यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रं शोणसरोजकान्ति तदपि क्षापि त्वया
स्थीयतां मालायाः करणोद्यमो मकरिकारंभः कुचाभोजयोर्धूपः कुंतलयोरणीषु सदृशः
सायं तनो दृश्यते १७ भयलज्जाह्रीपाशून्यः कामपीडया मन्तून् कृत्वा ऽकृत्यविचारश्रध
मः यथा उदयति हृदि नैव यस्य लज्जा न च करुणा न च कापि भीतिलेशः वकुलमुकुलको
शाकोमलां मा पुनरपि तस्य करेण यातयेथाः ८ ॥
दिभिरधिवासो दृश्यते इति सर्वत्र संबंधः सायं मालादिप्रसाधनं मत्संगमार्थं अत एवमुदासिताया
स्तव हास्यवर्जितादिकमर्थमेवेत्यर्थः शार्दूलवृत्तं १७ अधमलक्षयति भयलज्जा पेत्यादि स्पष्टयथेति
तमुदाहरति कश्चित्सखीं वदति हे सखि यस्य हृदि लज्जापि नैवोदयति करुणापि महिषयिकाद
यित्यर्थः कोपि भीतिर्न लेशोऽस्य न तस्यैवं भूतस्य करे पुनरपि अतः परमपि वकुलमुकुलानां कोषो

रस° मध्यभागस्तद्धस्तोमलोद्यानप्रान्तेयेयाः नप्रापयेथाः प्रच्छिन्नाग्राछंदः १८ प्रसंगादप्याह
टी° मानीयथा वाह्याहृतेति। रूपणादीनाद्दृष्टयः प्राणोपिकांतेनिपतेतिविश्राम्यति हे कां
ततवचोवचंनवाह्याकृतनपरायणांवाह्यावहिर्भवेन्योभिप्रायस्तत्परायणातत्प्रधानं म
४१ नोवज्ञोयमेयवज्रतुल्यं यतोवज्रमनस्तत्त्ववचंनसर्वमित्यर्थः इमामुक्तलक्षणां वा
चंश्रुत्वाविनयमपास्यमुक्ताप्रातः प्रभातेव्याजात्केनविन्मिषेणेत्यर्थः अदितिगृहागमीत्यर्थः
प्रस्थितेचलितेपुनर्वीतविलोकनेवीतत्यक्तं विलोकनंयेनतस्मिन्पुनःपरिहृतस्त्यक्तः आ

मानीचतुरश्रश्रावगवानर्भवतिमानीयथा वाह्याकृतपरायणांतवचोवज्ञोपमेयंम
नः श्रुत्वावाचमिमामपास्यविनयंव्याजाद्गृहिः प्रस्थिते प्रातवीतविलोकनेपरिहृता
लापेविहृतानेन प्राणोपिनियंततिहृतरूपणावामभ्रुवोदृष्टयः १९ वाग्चेष्टाभंगपस
मागमस्फुरतरः यथानमोजटालेहरिद्रंतरालेक्रोलेनिशायामलवनिर्गतायाः ततेनदी
नानिकटेवनानांचेटतशान्तोदरिकः सहायः॥

लापोयेनतस्मिन्पुनर्विहृतमानंयेनतस्मिन् आलापोभाषणमित्यमरः शार्दूलवृत्तं २०
चतुरमुदाहरति वागिति वाग्भंगसमागमस्फुरतरः तत्रवाचाभंगपः समागमोयस्येति तमुदा
हरति नमोजटालइतिकश्चिद्ग्रामिकांप्रतिवदति हे शान्तोदरिप्रान्तकृशमुदरयस्याः सातत्सं ४१

बोधेननिशायाःकालेसमयेतमोजटालेनमसंजटालाः प्ररोहायस्मिन्नेवंभूतेहरिदंतराले
हरितांदिशामंतरालेमध्याद्विनिर्गतायाम्लववनानांनिकटेसमीपेनदीनांसरितांतटेतीरे
कःसहायोचेटन वल्लभोहमेवेतिचतुर इत्यर्थः इंद्रवज्रोपेंद्रवज्रामिश्रितयादत्तादुपजाति
छंदः ११ चेष्टयांगसमागमो यस्यसः यपतिनमुदाहरति कांतइतिकांतेकनककुंभीरं
स्तवर्णावर्णाजंभीरफलविशेषः किमपिवैचित्र्यपूर्वकंकरेहस्तेकुर्वंतिमति इंदुमुखीनायि
काआगारलिखितेनभानोगृहभित्तिलिखितचित्रसूर्येविंदुनदर्पणकरूपंददौ दत्तवतीयेन

चेष्टांगसमागमोयथा कांतेकनककुंभीरंकरेकिमपिकुर्वंति आगारलिखितेभा
नौविंदुमिंदुमुखीददौ ११ प्रोतःपतिरुपपतिर्वैशिकश्चभवतिक्रमेणोदाहरणानि ।।
उत्कंठभोदृगपिकमलंशैवलंकेशपाशोवक्त्रंचंद्रोलपितममृतंमध्यदेशोमृणालं
नभानाह्लादकविंदुदानेनसूर्यास्तमयेसमयेतवमयासहक्रीडासंकीनइतिव्याजते अनुष्टुप्छंदः
१११ प्रसंगात्दक्षदाहरणोषितेति यातीतिपतिः स्वामीउपपतिः वैशिकश्चप्रत्येकंप्रोषितोभवति
क्रमेणोदाहरणानीति प्रोषितपतिमुदाहरति कश्चिद्विरहीनायकामनुस्मरन्नाह हंतेति
खेदमानायिकोचेद्यदिउरसिममहृदयेवर्तते इत्यर्थः तापस्यविरहजनितस्यशांतिःकथंनस्या

र.म. त्युपायमेवाभिनयपूर्वकमाह यस्याः नायिकाया ऊर्वोर्दिशु सर्वत्र संबंधः ऊरू रंभाकदलीद्व
टी. गपि द्वि रपिक मलं केशपाशाः केशसमूहः शैवलं शैवालः पाशाः पत्तश्च्छदस्तस्यकला
५२ यांशाः कचास्यर इत्यमरः वक्त्रमुखं चंद्रः ललितं वचनममृतं मध्यदेशो मृणालं विसं नाभिः
42 कूपः वलिरपि त्रिवलिरपि सरित्किंच पाणिः पल्लवः इत्थंभूतसामग्र्या सत्यामपि ता
पोपशांतिर्न भवतीति मद्भाग्यविपर्यय एवेत्यर्थः मंदाक्रांताछंदः ११२ उपपतिप्रोषितमाह॥

नाभिः कूपो वलिरपि सरित्पल्लवः किंच पाणिर्यस्याः सा चेद्द्रुमिनकथं हंत नायस्य
शांतिः ११२ उपपतिः प्रोषितो यथा यांत्याः सरः सलिलकेलिकुतूहलापव्याजादु
पेत्य मयि वर्त्मनि वर्तमाने भ्रूतः स्मितद्युतिचमत्कृतिहृत्कुरंगो हृंगीकृतं किमपि वा
मदृशः स्मरामि ११३॥

यांत्या इति सलिलकेलिकुतूहलाय सरः सरोवरं यांत्यास्या वाम
दृशः सुंदरनेत्राः व्याजात्किंचिद्दृष्टिक्षेपेत्यर्थः उपेत्य समीपमागत्य वर्त्मनि वर्तमाने मयि भ्रूतः
स्मितद्युतिभिः चमत्कृतायेहृत्कुरंगाः तेनांगीकृतं स्वीकृतं किमपि संकेतचेष्टितं स्मरामि वस
ततिलकं ११३॥

वैशिकं पतिमाह अधूर्तेति पुरस्सहृदयोवैदग्ध्याः स्मरचेष्टितं स्मरामि कथंभूतमधूर्तेनानधूर्तः प
रिपतितेनाविचोलस्यग्रंथिर्यस्मिंस्तत् अधूर्तादित्युसर्वत्र धूर्तत्वादितिभावः पुष्पिताग्राछंदः ११४
प्रसंगादन्यदप्याह अनभिज्ञ इति संकेतादिविशेषितं अभिज्ञमंतान्नजानातीति एवंभूतो नायकोना
यकाभासः नायकवदाभासते तमुदाहरति शून्य इति कापिहंसी वदति हेहंतिशून्येसद्मनिशहे

वैशिकमुपपतिमाह यथा अधूर्तपरिपतन्निचोलबंधमुषितनकारमवक्रदृष्टिया
नं प्रकटहसितमुत्तमास्यविंबंपुरस्सहृदयाः स्मरचेष्टितं स्मरामि ११४ अनभिज्ञो नायकोना
भास एव यथा शून्येसद्मनियोजिताबहुविधाभंगिर्वनेनिर्जने पुष्पव्याजमुपेत्यनिर्गत
मध्यस्फारीकृताद्दृष्टयः तांबूलाहरणाछलेनविहितैताव्यकोचवदेतात्हा वेतेनापि
नवेतिहृतिकियतायत्नेन सज्जास्यति ११५॥ बहुविधाबहुप्रकाराभंगिः अंगारचनायोजिता
कृतेत्यर्थः पुनःनिर्जनं जनरहितं वनं अथानंतरं पुष्पव्याजमुपेत्य प्राप्यनिर्गतंवहिर्निःसृतं
मयेतिशेषः पुनर्दृष्टयः स्फारीकृताविकासिताः पुनस्तांबूलस्यादरणछलेनग्रहणमिषेणाव
द्वोहहोस्तनो मकोविहितैमहतोपतेनापि उक्तप्रकारेणानवेत्तिनजानाति तर्हि कियतायत्नेनस
नायकाभासोज्ञास्यतिसमाभिलषितमित्यर्थः शार्दूलविक्रीडितं ११५॥

रस॰ टी॰ ४३ 43 प्रासंगिकमन्यदपि निरूपयति नचेति तेनेति भेदा इति उक्तादय इत्यर्थः तस्या नायिकाया अ
वस्थाभेद उक्तादिस्तद्भेदेन भेदाः विशेषः कालिकोवस्थेत्यमरः तस्य च नायकस्य स्वभावः प्र
कृतिस्तद्भेदेन भेदाः उभयोर्विशेषमाह केनेति स्वभावा इत्यत आह अनुकूलत्वमित्यादि अ
न्यच्च इत्यादि स्वीकर्त्तव्या इत्यंतेन स्पष्टं तयोश्चेति असंप्रदायात्प्राचीनसंप्रदायाभावादित्यर्थः
नच नायिकाया इव नायकदक्षिणास्य तैस्तैर्भेदाः संतीति वाच्यं तासामवस्थाभेदेन
भेदास्तेषां स्वभावभेदेन भेद इति विशेषादनुकूलत्वं धृष्टत्वं शठत्वं इति च तासु एव ना
यकस्य स्वभावाः अन्यच्च अवस्थाभेदेन नायकस्य भेदः स्यात्तदोक्तविप्रलब्धखण्डिता
दयोपि भेदाः स्वीकर्त्तव्याः तथाच संकेतमवस्थायां स्त्रीणामनागमेवा असंप्रदायादस्य
समागमशंकाभूतत्वं अन्यसंभोगचिह्नितत्वं वा नायकानां नतु नायिकानां ताः
कुत एतदित्यत आह अस्येत्यादि अन्यस्या अपरस्याः समागमस्य शंका वितर्कस्तेन भूतत्वं वा अन्य
स्याः संभोगचिह्नितत्वं वा नायकानां नतु नायिकानामित्यर्थः तदुद्भावनेन तेषां नायिकानामुक्ता
द्यवस्थानामुद्भावनेनोद्घाटनेन रसाभासापत्तिः शृंगारहानिप्राप्तिरिति अनौचित्यादित्यर्थः
उक्तं हि अनौचित्यादृते नान्यद्रसभंगस्य कारणमिति प्रासंगिकमन्यदप्याह तेषामिति तेषां ४३

नायकान्नान्नर्मणानुकूलहास्यादिव्यापारेण सच पतियोजयति सचनर्मसचिवः हास्यस
खइत्यर्थः सचिव इतिषचू संयोगेधातो रूपणादिस्वगये साधुः पीठमर्दादिभेदास्त्रतर्धा चतुप्र
काराइत्यर्थः ८ कुपितेति कुपितां वा सोमूचितितां प्रसादयतीति प्रसादकः प्रसादयितापी
ठं चरणान्निवेशस्थानं मृद्गातीति सः कोमलोमतश्चरणोकथमवतिदंताविन्यादिहास्येनसहश्ला
नुमवतीत्यर्थः यद्वा पीठं श्रृंगाररसमूपमृद्गातिश्रालोडयतीतिश्रर्थः तिन मुदाहरतिकोपामि
तिहेमानिनिम्रयंकोपविधिःकः आत्मनः प्रतिकूलत्वात् कुत्सितोयंपरित्याज्येत्यर्थः किंतु
प्रतिनन्द्रावृतेनरसाभासापत्तेरितितेषांचनर्मसचिवाः पीठमर्दकविटचेटकविदूष
भेदाच्चतुर्धा कुपितस्त्रीप्रसादकः पीठमर्दकः यथा कोयंकोपविधिः प्रयच्छकरुणा
गर्भवेचाजायतापीयूषद्रववीर्चिकापरिमलेरामोदिनीमेदिनी आलीनावासहृदयाल
लोचनमिरछावर्तयतोमुहुर्यस्मैकुप्यसितस्यमंदरितापोरहदानिवेदामहे ८६
करुणाद्रयागर्भमध्ययस्यतत् वचोवचनंप्रयच्छप्रियेप्रकटयेत्यर्थः अतएवतवहचोयःपीयू
षद्रवोमृतप्रवाहस्तस्यद्दीर्चिकातस्याः परिमलेगंधविशेषेमेदिनीभूमिः आमोदनीजायंता
वा अथवा हे सुंदरि आलीनाकोपाविधिः यतःस्पृहालुः स्पृहाशीले इंदेलोचनेनेत्रंमुहुर्वारंवारं
व्यावर्तयंती भ्रूचांकरुणामिवप्रावर्तयंती यस्मैकान्तायकुप्यसितस्मैतवकान्तस्य नपोहंदा

नितपः समहान् वेदामहे

निरवद्यत्वम्ः समृद्धिं विना तादृक्कोपप्रसादपात्रस्यालभ्यत्वादिति भावः यस्मै कुप्यसीति कुप्य
ड्डेहति स्रैणाचतुर्थी शार्दूलहृतं ॥१६॥ विटं दर्शयति कामस्य तंत्रः सिद्धान्तस्तस्य कलाभेदस्तत्र को
विदः प्रवीणः तंत्रः प्रधाने सिद्धान्ते निविश्वः यथेत्थमुदाहरन्ति आयात इति हे हो शादरि कुमु
देश्वरश्चन्द्रश्चायातः उदित इत्यर्थः सर्वेश्वरः सर्वेषामीश्वरः प्रेरकः मारुतो वायुर्विजयते विशेष
णशीतलमंदः सुगंधिरूपेणाजयतीत्यर्थः भैरवो भयानकः विरहव्यथाजनकत्वात भृंगो भ्रम

कामतंत्रकलाकोविदो विटः यथा आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृंगः
स्फूर्जति भैरवो न निकटं प्राणेश्वरो मुंचति एते सिद्धरसप्रसूनविशिखो वैद्योऽनवद्यो
त्सवो मानव्याधिरसौ क्षप्रोदरि कथं त्वच्चेतसि स्थास्यति ॥१७॥

रः स्फूर्जति इतस्ततो ऽोंकारशब्दं कुर्वन् प्राणेश्वरः प्राणवल्लभो निकटं न मुंचति ततः किमित्यत
आह एते कुमुदेश्वरादयः सिद्धरसाः सिद्धो निष्पन्नो रसः शृंगारो यैस्ते प्रसूनविशिखः पुष्प
बाणः कामः इत्यर्थः अनवद्योत्सवः अनवद्यः अनिंद्य उत्सवः तस्य रूपव्याधिनाशकः वैद्यः चिकित्स
कः असौ दृश्यमानो मानरूपव्याधिः त्वच्चेतसि तवमनसि कथं केन प्रकारेण स्थास्यति न स्थास्यती
त्यर्थः अयं च रसग्रंथेन कुमुदेश्वरभैरवप्राणेश्वररसैः सिद्धैर्व्याधिं निहंतीति इत्यर्थः शार्दू
लहृतं ॥२१॥ चेटकं दर्शयति संधानेति संधाने संयोजने चतुरः श्रेष्ठः चेटकः यथेत्थमुदाहरन्ति। ५५

सा प्रसिद्धा चंद्रवक्त्रा सुंदरमुखी नायिका सः प्रसिद्धः सकलकलाभिज्ञो नंदसूनुः कुंजगृहं समुपाज
गाम अत्रांतरे अस्मिन्नवसरे तयोर्मिलनसमये इत्यर्थः सहचरतीति सहचरः सखा तत्स्मरणोत्कंठकगेहे
नीते सति पानीयस्य जलस्य पानकपटेन मया स्मरागप्रतस्थे अयमर्थः तेन मिलनं न गायं जानन्नुपस्था
ने कृत्वा वा तित्यर्थः वसंततिलकं छंदः ११८ विदूषकं दर्शयति अंगादीति स्पष्टं यथेति तमुदाह
रति पानीयेति कश्चिन्नायिको वयस्यं प्रतिवदति नीरजमुखी नायिका शायितो पकंठ शय्यासमीपे
संधानचतुरश्चुदकः सा चंद्रसुंदरमुखी स च नंदसूनुर्दैवान्निकुंजभवनं समुपाजगाम
अत्रांतरे सहचरस्मरणोत्कगेहे पानीयपानकपटेन मया प्रतस्थे ११८ अंगादिवैकृत्ये
हास्यकारी विदूषकः यथा पानीयनीरजमुखी शयने निपकंठमुत्कंठितोस्मि कुचकं
चुकमोचनाय अत्रांतरे मुहुरपि विदूषकेण पानस्नानस्नानहरणकुटकंठनादः ११९ स्वेदः
स्तंभोथ रोमांचः स्वरभंगोथ वेपथुः वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका गुणाः ॥
पानीयकुचकंचुकमोचनाय उत्कंठितोस्मि अत्रांतरे विदूषकेण पानस्नानः पानभावः तद्हरणकु
कुटकंठनादो मुहुर्वारं वपुमकारि कृतः तथा चेष्टितस्मानि रात्रेपि प्रातर्भुक्त्याहास्यकारित्वात्
वसंततिलकं छंदः ११९ एवं शृंगाररसं निरूप्य सात्विकभावान् दर्शयति स्वेदः स्तंभ इति सर्वान
पि विस्तारभिया पके नैव पद्येन दर्शयति यथा भेदो वाचीत्यादिना

र.म.
टी.
४५
45

कोपि सात्विकभावपुनोंगी यीशच्छति हे सुंदरि सप्रसिद्धः कोटिकंदर्पलावण्यः व्रजेंद्रस्यनंदस्यन
नयः पुत्रः त्वया किमालोकितो दृष्टः यतो वाचि वाग्विषये भेदः स्वरभंगो गद्गदत्वेत्यर्थः समुज्जृंभ
ते प्रकाशते इति मनो विना सर्वेष्विंद्रियेषु योज्यं दृशो नैत्रयो जलमानंदाश्रु कुचतटे स्वेदः अतिकठिन
मपि कुचतटं प्रस्वेदयुक्तमित्यर्थः अधरे प्रकंपः चुंबनलालसत्वेनेत्यर्थः जातोपरस्पकंपनमित्यर्थः
गंडतटी पांडुः तद्विरहतापात् कपोलस्यैव वर्णापमित्यर्थः वपुर्गात्रं पुलकितं तन्मस्मरणात् मनो ली
नं न चेष्टते तिष्ठति प्रलयो नष्टचेष्टत्वमित्यर्थः नयनश्रियो नंदलत्याग्रालस्यं तद्विलोकनमाति
भेदो वाचि दृशोर्जलं कुचतटे स्वेदः प्रकंपोऽधरे पांडुर्गंडतटी वपुः पुलकितं लीनं मनस्तिष्ठति ॥
आलस्यं नयनश्रियः श्रवणयोः स्तंभः समुज्जृंभते तत्किं सुंदरि स व्रजेंद्रतनयः कस्त्वयालोकि
तः ॥२१॥ रतिस्थायीभावः शृंगारः स च द्विविधः संभोगो विप्रलंभश्च संभोगी यथा
रे केनाप्यत्र दर्शितायोग्यतात् पुनः स्मरणायोः त्वं भोज डनाम सकलकलानिधेस्तादृशस्यावलोक
नं विना एतादृशावस्थानुदयादिति भावः अत्रानुमानालंकारः शार्दूलवृत्तं अथ शृंगारं दर्शयति ।
रतीति रतिः स्थापिभावो यस्य सः शृंगारः तथा च रतिः रतिहासश्चेत्यादि स च शृंगारो द्विविधः द्वे
विधे प्रकारौ यस्य सः संयोगविप्रलंभरूपात् संयुक्तयोः स्त्रीपुंसयोरालिंगनादिरूपः संभोगः विप्र
लंभो वियुक्तयोरभीष्टाप्राप्तिरूपो वियोगः ॥ तत्र संयोगो यथेति संभोगमुदाहरति ॥ ४५

वियतीति वियत्यंतरिक्षे जलदो मेघो विलोलति लुलति विमर्द्धावत: विधुश्चंद्रः स्खलति पतति
चेष्टते चलति कपोतः पक्षी कूजति शब्दायते तारकाणां नक्षत्राणां ततिः समूहो निष्पतति भ्रमर
वाहिन्यां गंगायां वीचिस्तरंगः आंदोलति आंदोलः इवाचरति चरादि वीताणादिति णपंताभावः प्रस्तुते
ऽर्थे जलदादीनामनुपयोगात् जलदेनाभ्रमजलयुक्तकेशनायिकायाः विधुना मुखचंद्रः कपो
तकूजितेनकंठध्वनिः नक्षत्रनिपतनेन हारत्रुटिः केशग्रंथिपुष्पपातो वा गंगावीच्या मुक्ताहा
रलतांदोलना उपरिवर्त्तमानत्वाद्भ्रमरवाहिनी विशेषणात्पतेन विपरीतरतिः संभोगो ध्वन्यते।

वियति विलोलति जलदः स्खलति विधुश्चलति कूजति कपोतः निष्पतति तारकात
तिरांदोलति वीचिर्भ्रमरवाहिन्याः। विप्रलंभो यथा। प्रादुर्भूते नवजलधरे त्वत्पथं द्र
ष्टुकामाः प्राणाः पंकेरुहदलदृशः कंठदेशं प्रयाति अन्यत्किं वा नवमुखविधुं द्रष्टुमु
द्ग्रीयगंतं चक्षुः पक्ष्म त्यजति विमिनीपल्लवस्य छलेन १२३॥
आर्याभेदोपगीतिश्छंदः विप्रलंभो यथेति नमदाहरति प्रादुर्भूत इति काचित्सखी विरहिणं
प्रियं वदति हे विरहिन् त्वत्पथं नवपथ्या त्वत्पथः तं द्रष्टुकामाः पंकेरुहदलदृशः कमल
पत्रनेत्रायाः नायिकायाः प्राणाः कंठदेशं प्रयांति प्रकर्षेण आप्नुवंति अन्यद्वा अन्यदपि नवमु

रस॰ टी॰ ४९ 46

त्वद्विधुंचेदृष्टुंऊरःस्थलादुड्डीयगंतोविस्मिता॰ पल्लवस्यछलेनकिंपतत्रंसृजति अन्यथा
वत्सस उड्डीनास्मभवान् विस्मितौपक्षिणीमुखे इत्यमरः अत्रोत्प्रेक्षालंकारः मंदाक्रांताछंदः
१२३ विप्रलंभेचाभिलाषादयोदशावस्थाभवंतिताः स्वयमेवसूचयति नेत्रेति तत्रतासंसग
मस्यमिलनस्येछाभिलाषः यथेति तंलक्षयति तस्यामिति कश्चित्सर्वोनुरागीनायकोवदति।

विप्रलंभेचाभिलाषचिंतास्मृतिगुणकीर्तिनोद्वेगप्रलापोन्मादव्याधिजडता
निधनानिदशावस्थाभवंतितत्रसंगमेछाभिलाषः यथातस्यांसतनुसरस्यां
चेतोनयनंविनिष्पतितं चेतोगुरुचनिमग्नंलघुनयनंसर्वतोभ्रमति १२४॥

तस्यांप्रसिद्धायांरूपलावण्यादियुक्तायामित्यर्थः सुतनुरेवसरसीसरस्यांचेतोनयनंच
निष्पतितमग्नं तत्रचेतोमानसंगुरुस्त्वेतोनिमग्नमस्तिनयनंलघुसर्वतोभ्रमति तच्चतस्
स्यामेवमग्नंनेत्रंदर्शलालसंतत्रपर्यवभ्रमतीत्यर्थः आर्याभेदउपगीतीछंदः १२४ ४९

चिंतामाह दर्शनं च संतोषश्च तयोः प्रकारस्य कि यया जिज्ञासा तां तामिच्छा तस्याः श्रितं तं स्मरणं चिं
तायथेति तमुदाहरति मयेति मया तस्मिन् कुंजोपकंठे कुंजसमीपे अद्य कलंकदानां नाम्नो विधेयः।
कर्तव्यः यतः राधा कदा मयो वर्तमानस्य विभ्रमं भ्रांतिमावहंती नेत्रोत्पलतोरणानि हावान् कुर्वीत
तोरणांच वहिर्द्वारद्वावयोरिति मेदिनी इंद्रवज्रोपेंद्रवज्रयोरुपजातिः १२५ प्रथमस्मृतिं दर्शयति।
प्रियाश्रितेति प्रियमिष्टं तदाश्रिता याच चेष्टा तया उद्बोधितो यः संस्कारस्तज्जन्म ज्ञानं स्मृतिः यथेति तत्

दर्शनसंतोषयोः प्रकारजिज्ञासा चिंतनं चिंता यथा मया विधेयामधुरद्य तस्मिन् कुंजोपकंठे
कलंकवनादः राधा मयो विभ्रममावहंती कुर्वीत नेत्रोत्पलतोरणानि २५ प्रियाश्रित
चेष्टाप्रबोधितसंस्कारजन्म ज्ञानं स्मृतिः रामो लक्ष्मणदुःखदीर्घचकितो नो नाविष्करोति
व्यथां श्वासं नो समनंतरं जहाति सलिलं धत्ते न वा चक्षुषि ज्वालावर्तविवर्तमानदहनक्रूरै
रंगैर्ज्वरैः रामः किं तु विदेहराजतनयां भूयः स्मरन्वर्तते १२६॥

मुदाहरति राम इति लक्ष्मणस्य यद्दीर्घदुःखं प्रभ्रान्त्या चापात पातरूपं तेन च चकितो व्याकुलो रामो व्य
थादुःखं नाविष्करोति न प्रकटयति पुनः श्वासं समनंतरं अनुस्मेन जहाति वा अश्रु वा चक्षुषि
ज्वालावेकावचनं नेत्रयोः सलिलं न धत्ते नेत्रांबुन दधातीत्यर्थः किं तु विदेहराजो जनकस्तस्य तन

रस· टी· ४६

46
47

यामीनां भूयो वारंवारं स्मरन्नुवर्त्तिनेति ध्वनितोऽर्थः किंभूतो रामः कान्तावर्जनेन कातप्रमरोन विव
र्त्तमानो दह्यमानोऽग्निस्फुलिङ्गक्रूरैः अनंगज्वरैः कामसंतापैः क्षामः क्षीणः शार्दूलवृत्तं १२६॥
गुणकीर्त्तनं दर्शयति विरहेति विरहकालीनं विरहकाले भवं कान्ताविषये यशःप्रशंसा
गुणप्रतिपादनं गुणकीर्त्तनं संभोगेपि गुणकीर्त्तनं परिहाराय विरहकालीन इति विशेष
णं प्रशंसायैथेति तामुदाहरति कश्चिन्नु विरही वदति हे सखे स्पर्शः स्पर्शनव्यापारश्चेन्नू तर्हि

विरहकालीनकान्तागुणकीर्त्तनं प्रशंसा यथा स्पर्शः स्तनतटस्पर्शो वीक्षणं वक्त्रवी
क्षणं तस्याः केलिकथालापसमयः समयः सखे १२७ कामक्लेशजनितसकलवि
षयहेयता ज्ञानमुद्वेगः यथागरलद्रुमकंदमिंदुबिंबं करुणावारिजवारणेव संतः
रजनी स्मरभूपतेः कृपाणी करणीयं किमतः परं विधातः १२८॥

तस्या नायिकायाः स्तनतटस्पर्शः वीक्षणं दर्शनव्यापारश्च तस्या वक्त्रवीक्षणं समयः प्राप्सामर्थ्यं
चेत् तस्याः केलिकथालापसामर्थ्यं भवतीति सर्वत्र योज्यं अनुष्टुप्छंदः २७ उद्वेगं दर्शयति का
मक्लेशजनितसकलविषयकहेयता ज्ञानं स उद्वेगः यथेति तमुदाहरति कश्चिद्विरहीव
दति इंदुबिंबं चन्द्रमंडलं गरलद्रुमस्य विषवृक्षस्य कंदं मूलं किं च वसंतः कान्ताकरुणेव वारिजंकम ४६

लितस्य वारणः गज इव वर्तसे निष्फिकमलानाम् अभावो भवतीति किंच रजनी रात्रिः स्मरभूयते ऽकामस्य
राज्ञः कृपाणी शस्त्री प्रस्तुतमाह हे विधातः अतः परं किं करणीयं एतेषामसहत्वादिति भावः ऽ उप
छंदसिकं छंदः प्रलापं दर्शयति प्रियाश्रितेति प्रियाश्रितोयः काल्पनिकः कल्पनानिष्पन्नो व्यव
हारः स प्रलापः अंतः करणस्य मनसो विक्षेपो व्यापारः तस्य विक्षेपस्य निदानं कारणं ऽ उत्कंठं यथेति

प्रियाश्रितकाल्पनिकव्यवहारः प्रलापः कल्पनाया करणं अंतः करणविक्षेपस्य
निदानमुत्कंठा यथा अद्विसंवीक्षणं चक्षुरद्विसंमिलनं मनः अद्विसंस्पर्शनः पाणी
रद्य मे किं करिष्यति १२८ औत्सुक्यतापादिकारितमनोविपर्यासमनुष्यदूषिताश्रि
तव्यथाव्यापार उन्मादः

तमुदाहरति ॥ अद्यीति काचित्सखीं वदति अद्य मे चक्षुर्नेत्रं अद्विसंवीक्षणं तद्वयोः संवीक्षणं यत्र
तत् किं करिष्यतीति मन आदिष्वपि योज्यं किंच मनः अद्विसंमिलनं तद्वयोः संमिलनं यत्र तत् किंच पा
णिर्हस्तः अद्विसंस्पर्शः तद्वयोः संस्पर्शनं यत्र तत् इति रिक्तानां चक्षुरादीनां का कथा भविष्यतीत्यर्थः
अनुष्टुप्छंदः १२९ उन्मादं दर्शयति औत्सुक्येत्यादि औत्सुक्यं कालासहिष्णुत्वं संतापः सज्वरः आदिना
भ्रमः इति एतैः कारितो यो मनो विपर्ययो व्याकुलता ततः समुत्पन्नो जातः प्रियाश्रितो व्यथाव्यापारः

र.म.
टी.
४८

47
48

निरर्थकं उद्यमः स उन्मादः व्यापारोपि कायिको देहिको वाचिकश्च तत्र कायिको यथेति कायिकमुदाह-
रति प्रतिफलमिति कोपि नायकः अमृतांशोरस्य प्रतिबिंबं प्रेत्यावलोकमृगाक्ष्या नायिकायाः
मुखमिति परिहासं कर्तुं अभ्युद्यतोभूत अथानंतरं शिथिलितवाचः त्यक्तवाक्यायास्तस्या मानंश्चा
शंक्य पुलकान्निरोमांचान् भजते इति तेन पाणिपंकेरुहेण हस्तकमलेन स्पृशति अनुनयार्थमि
मिति भावः अत्र समाध्यालंकारः मालिनीछंदः १२ वाचिको यथेति वाचिकमुदाहरति किंरे

कायिको वाचिकश्च कायिको यथा प्रतिफलममृतांशोः प्रेत्य कोपि मृगाक्ष्या मुखमि
ति परिहासं कर्तुमभ्युद्यतोभूत् अथ शिथिलितवाचो मानमाशंक्य तस्याः स्पृशति पुलक
भाजा पाणिपंकेरुहेण १२ वाचिको यथा किंरे विधो मृगदृशो मुखमद्वितीयं कंद
र्पदर्पमसि हे गंडुजमन्यदेव झंकारमावहसि भृंग तनुं न तादृक्कोमाधिकं न पुनरीदृश
मीक्षणीयं १३

विधो इति रे विधो चंद्र किं दर्पमसि मृगदृशो नायिकाया मुखं अद्वितीयं निरु
पमम् पुनः रे कंदर्पका मकिं दर्पमसि मृगदृशः एतद्गंडुजं नेत्रकमलं अल्पनवपुष्पवाणत्वा
एतत्कमलतुल्यं न भवतीति किं गर्वमावहसीत्यर्थः पुनः रे भृंग झंकारं किमावहसि यत स्ता
दृक् तादृशी तनुस्तन्वी न कृशांगीत्यर्थः पुनः कर्माधिकं व्यापारानुधिकं निंद्यानीत्यर्थः न पुनरीद ४८
र्शनत्वा दृशमीक्षणीयं दर्शनीयं वास्तिमर्थः वसंततिलकछंदः १३

व्याधिं दर्शयति मदनवेदनेति मदनवेदना कामसमुत्थो यः संतापकार्श्यादिदोषः स व्याधिः यथेति ॥
तमुदाहरति कोदंडमिति कापि दूती नायकं प्रतिवदति हे स्वामिन् कामस्य कोदंडं धनुः विशि
खो बाणाः मनो निवृत्तिः मनस्विवासस्थेति चिंतयं समुन्मीलति समज्जं भवेन तस्यापि भ्रूवल्लिर्भ्रू
लता यतेन धनुः तथा नयनांचलं नेत्रकोणाः एतेन विशिखेः तेन मनस्विवासस्थेति चिंतयंत्ये
तयोः कामतत्सख्योः साम्यविधौ कोदंडादि भ्रूवल्यादि साम्यं प्रभवति समति तथास्मिन् ह्यनांग्रेमकि
यंता यथाक्रमात् अवस्थाभेदेन एषा मत्सखी तनुतां तन्वाना विस्तारयंती अतनुतामनंगतां

मदनवेदनासमुत्थसंतापकार्श्यादिदोषो व्याधिः यथा कोदंडं विशिखः मनोनिव
सतिः कामस्य तस्या अपि भ्रूवल्लिनयनांचलं मनस्विनि वासः समुन्मीलति इत्यसाम्य
विधौ तयोः प्रभवति स्वामिंस्तथास्मिन्नयंता तन्वाना तनुतां क्रमादतनुतां नैषा यथा ग
च्छति ।२१। विरहव्यथाविष्करणमात्रवेद्यजीवितावस्था जडता यथा

जडतां दर्शयति विरहेति वि
न गच्छति यथा कामोऽनंगस्तथेयं तन्व्यादि स्पर्धः शार्दूलवृत्तं ।२२
रहस्य व्यथा पीडा तस्या आविष्करणमात्रेण वेद्यं ज्ञेयं यज्जीवनावस्थानं तज्जडता जडस्य भावः यथेति
तामुदाहरति पाणिरिति काचन दूती नायकं प्रतिवदति हे धान्वैनस्तस्याः पाणिः नीरवकंकणः

रस॰ टी॰ ४८ ४९

नीरवंशब्दरहितं स्खलनाभावात्कंकणं यस्मिन्सः तस्याः स्नाननटीनिष्कंपमानं सत्रस्तुकं यस्या
सा यथा दृष्टिः निश्चलतारिका यस्यां सा तथा कुंडलकर्णभूषं निःसीमं उत्तत्त्ववत्क्रियाशाहि
त्यमित्यर्थः यदि त्वन्नाम मम स्मरणेन मन्मुखाद् उच्चरितेन कोपि अंकुरन् पुलकारंभो रोमांचोद्गमो
न समुज्जृंभते प्रकाशते तर्हि चित्रार्पितया चित्रलिखितया समं मम सह को भेदो भवेन्न कोपीत्यर्थः
शार्दूलवृत्तं ९२ निधनस्यामंगलत्वान्नोदाहृतिः अथ प्रियालोकना प्राप्तोपताप्त्रवस्या जायते।

पाणौ नीरवकंकणः स्नाननटीनिष्कम्पमानास्तुका दृष्टिर्निश्चलतारिका मम भव
न्निःसीमं उत्तत्वकुंडलं कश्चित्रार्पितया समं ह शतेनो भेदो भवेन्नो यदि त्वन्नाम मम स्मरणेन
कोपि पुलकारंभः समुज्जृंभते ९३ स्वप्नचित्रमायाच्छायादिभेदेन दर्शनं त्रिविधम् स्वप्नदर्श
नं यथा मुक्ताहारं न च कुचगिरेः कंकणं नैव हस्तात् कर्णात्स्वर्णाभरणमपि वा नीं हृ
तवान्नैव तावत् अयमस्वप्ने वकुलमुकुलस्पर्धिना कौरणः श्यामश्चौरो हृदयमहरत्

अत तद्दर्शनं बहुविधमित्याह स्वप्नेति स्वप्नं च चित्रं च माया च छाया चेतेषां भेदेन दर्शनं त्रिधा त्रिप्रकार
मित्यर्थः स्वप्नदर्शनं यथेति तमुदाहरति मुक्ताहारमिति हे सखि स्वप्ने अयं स्वप्ने वकुलमुकुले
भूषणं स्पर्धिना दधत् श्यामः श्यामवर्णश्चौरो मम हृदयमहरत् तं चोरं न प्रतीमो न जानीमः या
वत्तावद्बालकोरकुचगिरेः मुक्ताहारं न च हस्तात्कंकणं नैव अपि वा कर्णात्स्वर्णाभरणं नैव

चित्रदर्शनं यथेत्युदाहरति नीवीमिति वालापटे पुलिखितं विचित्रितं दर्शितं पूर्ववत् नीवीं हरेत्
मोचयेत् पुनः नखेन उरसिजं स्तनं विलिखेत् च पुनः अकस्मात् दललितं दशनेन दंतच्छदं अधरं द
शेत् इत्थम् अनेन प्रकारेण विहारशंकां न जहाति नत्यक्तवती वसंततिलकं छंदः १२५ साक्षाद्दर्शने
यथेति तदुदाहरति हे चेतः अञ्चलं तां त्वचापल्यात् त्यज हे प्रियसखि व्रीडे लज्जे मानं पीडय वांछितं मे
गादित्यर्थः हे भ्रातः निमेष दृशोर्मुंच त्वमपि स्थित्वेन दर्शनांतरायादिति भावः हे काम मदनत्वंं ण

चित्रदर्शने यथा नीवीं हरेदुरसिजं विलिखेन्नखेन दंतच्छदं च दशनेन दशेदकस्मात्
उत्संपटे पुलिखितं दर्शितं विलोक्य वाला पुरेव न जहार विहारशंका १२५ साक्षाद्दर्श
ने यथा चेतः अञ्चलतां त्यज प्रियसखि व्रीडे न मां पीडय भ्रातर्मुंच दृशो निमेष भगवन् का
मत्त्वमपि तावद् वर्हं मूर्ध्नि कर्णयोः कुवलयं वैशद्ध्यान स्कंधे सोऽयं लोचनगोचरो भव
नमेदामोदरः सुंदरः १२६
त्वमपि तावत् मन्मथः पीडाकरणादित्यर्थः यतो मूर्ध्नि वर्हं पिच्छं कर्णयोः कुवलयं कमलं कंठे वैशद
ध्यानः सः प्रसिद्धः अयम् अस्मिन्नुभवेन सुंदरो दामोदरः दाम उदरे यस्य सः श्रीकृष्णः यशोदया क
स्मिंश्चिदपराधे दाम्ना लूखले वद्धत्वात् नंदकिनोदरेत्तिनाम काधीनं तद्दर्शितं मे मम लोचनगोच
रो भवति नेत्रविषयो भवतित्यर्थः शार्दूलविक्रीडितं १२९

र.म.
टी.
४९
५०

एवंग्रंथेहत्वाकवीन्प्रतिवदति माध्वीकेति भोकवयः कोमततरिः ममहृपपारमपुत्का मंजरी
नोकर्णभूषणीकुर्वंत किंभूतां माध्वीकंमधुतस्यस्पदः स्रवणंतस्यसंदोहः समूहस्तेनमुंदरी
सवंतःकमनीयामित्यर्थः अनुष्टुप्छंदः १३७ पित्रादिकंप्रकाशयन्ग्रंथसमाप्तिंकरोति।
तातइति यस्यकविकुलालंकारचूडामणिर्गणेश्वरस्तज्ञामातातः पितायस्यसरमतिरिता

माध्वीकस्यदसंदोहसुंदरीरसमंजरी कुर्वत्हकवयःकंठभूषणंहृपयाममम १३७
तातोयस्यगणेश्वरःकविकुलालंकारचूडामणि देशोयस्यविदेहभूःसुरसरित्क
ल्लोलकिर्मीरिता पद्येनस्वकृतेनतेनकविनाश्रीभानुनायोजिता वाग्देवीश्रुति
पारिजातकुसुमस्पर्धाकरीमंजरी १३८॥ इति॰

गंगायःकल्लोलैःकिर्मीरिताचित्रिताविदेहभूःजनकभूमिःदेशःतेनमुक्तादेशइत्यर्थः
तेनकविनास्वकृतेनपद्येनश्लोकेनरसमंजरीतन्नामग्रंथःयोजिताकृतेत्यर्थःकिंभूतावाग्दे
व्याःसरस्वत्याःश्रुतीकर्णीयत्पारिजातकुसुमेकल्पतरुपुष्पंतस्यस्पर्धाकरोतीतिस्पातत्तुल्ये

= ५९ ॥ ३

र

४९

श्रीमद्भाविदेनीवृद्दंदबुधिविधुः श्रीमान्नसिंहोभवद्भटः श्रीहरिवंशउत्तमगुणग्रामैक
भूस्तत्सुतः तत्पुत्रस्सकृतिस्त्वियंविवनुतंगोपालनाम्नोमुदंगोपीनाथपदारविंदमकरं

इतिश्रीभानुदत्तविरचितारसमंजरी समाप्ता ॥ ३८ ॥ ६५ ॥

दामंदिचेतोलिलः । मत्सरपरिहृतमनसांसुधियांपुरतः परिस्फुरत्वेषारसिकलला
टतटस्थारस्यारसमंजरीटीका । इतिश्रीहरिवंशभट्टैकचरणशरणगोपालभट्टकृ
तारसिकरंजनीटीकासमाप्ताः ॥ शुभम् संवत् १९१९ ॥ ५१

कोपिसात्विकभावपुलंगोगीपीएछति देहं देशिष्यसिद्धः कौटिकं दर्पलावण्यः व्रजेन्द्रस्यानन्दस्यतनयः पु
त्रः त्वयाकिमालोकितो दृष्टः यशोवाचिवाग्विषयेभेदः स्वरभंगोगद्गदत्वेनत्यर्थः समज्जृंभेतप्रकाशते
तिमनोविनासर्वं यदेषुयाज्यं दृष्टोनैत्रयोजैलमानंदाश्रु कुचतटे स्वेदः अनिकविनमपि कुचतटप्र
स्वेदयुक्तमित्यर्थः अधरेप्रकंपः चेत्वनलालसत्वेनधैर्यं वेतायरस्यकंपनमित्यर्थः गंडतटीपांडुः तद्वि
रहतापात्कपोलसौवर्ण्यमित्यर्थः वपुर्गात्रं पुलकितंनतस्मरणान्मनोलीनंनष्टंचेष्टंनेतिष्टति